॥रा·गी॥

॥१॥

सीतारामंहनूमंतंगणेशंशंकरंतथा॥प्रियादासागुरुंनत्वाकुर्वेटीकां
प्रबोधिकं॥१॥कृत्वाश्रीरघुनाथपादकमलेबुद्धिप्रदेवंदनं॥गीतायारघुनंदनस्यकुरुतेश्रीदेवदासाभि
धःटीकानामप्रबोधिकांपरतरंश्रीरामभक्तिप्रदांमज्ञानांधतमोनिवृत्तिकरणींमोदप्रदांसर्वदाः॥२॥अथपरव
लुमहाकारुणिकःसकलजगद्धितार्थेभगवान्वेदव्यास॥संसारसागराणलसंतप्तान्॥श्रीरामतत्वम

प्रभुणातेनरामेणानिहतेराक्षसेश्वरे॥स्वस्थेषुत्रिषुलोकेषुधर्मेचस्थितिमागते॥१॥सीता
यामनवद्यायामेनीतायांहविर्भुजः॥कथंक्रोधाग्निरुद्भूद्रामस्यासमयेपुनः॥२सीताराम

विजानतोजनान्॥श्रीरामतत्वोपदेशेनोद्धर्तुकामः॥स्कंदपुराणेनिर्वानखंडेऽध्यायात्रितयेनसकलो
पनिषत्सारभूतेनशुकसनकसंवादमाश्रित्यश्रीरामतत्वंनिरूपयितुं॥सनकस्यप्रश्नंनिरूपयतिसनक
उवाचेत्यादिना॥तेनप्रभुनारामेणराक्षसेश्वरेनिहितेसतिरा[illegible]मस्याःसमयेकथंक्रोधाग्निरुद्भूदि
तिद्वितीयश्लोकेनान्वयःसीताप्राप्नयेतस्यक्रोधःइतिचेत्तत्राहसीतयामिति॥२॥कृतकृत्यःइतिकृते
कृत्स्नरावणावधूरूपंसीतानयनरूपंचयेनसःकीदृशः॥भगवान्ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः
ज्ञानवैराग्ययोश्चापिषण्णांभगइतिंगनेसुकृससमग्रैश्वर्यादिषट्गुणसंपन्नः॥इत्थंभूतोपिरामोयस्तुन

भृक्रोधरघुवंशस्य यो मम हृदि वर्त्तते ॥ तं छिंधीति शेषः ॥ नघाम समस्तकामस्य निहतसकलदेवद्विष
त्ति पक्षस्य श्रीरामस्य क्रोधः संभवतीभावः ॥ आरणोय इति भुकस्य संबोधनं ॥ ३ ॥ श्रीरामचरित्रश्रवणौ
त्सुक्येन मत्सत्साहयति ग्रहो इतिये ॥ पुरुषे राम वैभवं दृष्टं त एव धन्यतमाः वै शब्दोऽवधारणार्थः कृत
इत्यत आह घेपि कालव्यवहितेपि श्रवतामपि न तु साक्षात्पश्यतां ततोऽस्माकं रोमहर्षो भिवर्द्धते अतोऽव
पधन्यतमा इति भावः ॥ तत्कालिकाश्रीरामचरित्रमनुपश्यतां धन्यतमात्वं किमु वक्तव्यमिति भावः ४ ॥

कृतकृत्योऽपि भगवान् राम भृक्रोधयत्नुनः ॥ आरणेय महानेष संशयो हृदि वर्त्तते ॥ ३ ॥
अहो धन्यतमास्ते वै यैर्दृष्टं राम वैभवं ॥ श्रवतामपि नो घापि रोमहर्षोऽभिवर्द्धते ॥ ४ ॥ श्री
शुक उवाच ॥ अथ तस्मिन् विनिहिते रावणे लोकरावणे ॥ रक्तवत्सु सिद्धसंघेषु स्वरूपं स्मा

विस्मृत्यं मानुषरूपेणावतीर्णोऽइति मत्वा नानादेवानां तान्निवर्त्तयेत्वा साधारणोऽग्वर्यप्रदर्शनाय च क्रोध इ
ति स्वां तं स्मादिति हेतुनास्फुटीकर्तुं श्रीशुक उत्तरं वक्तुं प्रचक्रमे अथेति ॥ अथ शब्दो मंगलार्थः ॥ स राम त
स्मिन् रावणे निहते सति सदेवासुरमानुषमेतद्विश्वमावृत्य व्याप्य तदा वहिरंतश्चावर्त्तते ति तृतीय
श्लोकेन संबध्यते सिद्धसंघेषु सिद्धसमूहेषु स्वस्य रामस्य यद्रूपं तच्च त ॥ रक्तवत्सु सत्सु तस्मात्स्मारयत्स्व पि ५

२

स्वरूपस्य चर्मचक्षुषाद्रष्टुमशक्यत्वाद्दर्शयन्निवेत्युक्तं॥ मानुषभावंमनुष्यनाट्यंविसृज्यस्वस्मिन्संली
२ पकुतइत्यत॥ आहस्वच्छंचेष्टितइति॥ स्वतंत्रइतियावत्॥ ६॥ कथमवर्ततेत्यत॥ आहयथेति॥ निजैकतांगो ६
पयित्वायथाहंप्रपंचोभवं॥ तथायमप्रपंचतामुत्सृज्यभूय॥ पुनरेकएवस्यामितिहेतोर्ववधइतिद्वितीयश्लो
केनसंवध्यतेएकताचात्रयथाजलेप्रक्षिप्तंसैंधवसकलंजलमेवभवतीतिश्रुत्युक्तनामरूपविभागाभावा
भिप्रायेणतथाचनामरूपरहितचेतनशरीरस्यरामशरीरभूतेब्रह्मणिलीनस्यैकताजगद्रूपेणवहुवचनं

दर्शयन्निवसर्वेषांस्वरूपंपारमेश्वरं॥ विसृज्यमानुषंभावंरामःस्वच्छंदचेष्टितं॥ ६॥ विश्वमेतद्दशो
येणासदेवासुरमानुषं॥ आवृत्यसतदारामोवहिरंतरवईत॥ ७॥ यथाभवंप्रपंचोहंगोपयित्वाति ५२
मेकतां॥ स्यामेकएवभूयोधतथोत्सृज्यप्रपंचतां॥ ८॥

चनामरूपरहितचेतनाचेतनस्यरामशरी
रभूतेब्रह्मणिप्रलीनस्यानेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुत्युक्तनामरूपविभाग
भिप्रायेण॥ तथाचचेतनाचेतनस्यतच्छरीरभूतेब्रह्मणिलीनस्यस्थूलरूपेणावस्थानंवहुभवनमः॥
इतरथाकेवलस्यैवजगद्रूपेणावस्थानेविकारित्वापत्तेर्निर्विकारश्रुतिविरोध॥ रामस्यचेतनाचेतनश
रीरत्वेप्रमाणं॥ यस्यात्माशरीरंयआत्मानमंतरोयमयतियस्याव्यक्तंशरीरंयोक्षरमंतरेसंचरन्यमक्षरं

नचेदयस्यास्वशरीरमितियामिच्छसि महाराज तां तनुं प्रविशस्व कां ॥ वैष्णवीं तां महातेजो यद्वाकाशं सना
तनमितिच ॥ च ॥ कीदृशोरामः ॥ अखंडचिदानंदस्वरूपावेशब्रंहितः ॥ अखंडश्चिदानंदस्वरूपे तच्छरीरभूते ब्रह्म
णियश्चावेशः ॥ प्रवेशस्तेन ब्रंहितः पतः प्रकाशोपबृंहितो ततः परमाकाशः ॥ परमप्रकाशयुक्तः ॥ विश्व
ग्रामः ॥ विश्वेषां ग्रामाः ॥ समूहा यस्मिन्सः ॥ यतो विश्वस्य ब्रह्मणोप्याधारभूतो ततः प्रभुः समर्थ इत्य
र्थः ॥ ननु च किं कृतवानित्याकांक्षायामाह दिवं चेति ॥ स्वातंत्र्यात्स्वरक्षादावेव भुवनान्युपसंहर्तुं प्रच

ऽखंडचिदानंदस्वरूपावेशब्रंहितः ॥ ब्रह्मधे परमाकाशो विश्वग्रामस्तदा प्रभुः ॥ ९ ॥ दिवं च पृथ
वीं चैव निरीक्ष्य च दिशो दश ॥ स्वातंत्र्यादुपसंहर्तुं भुवनान्युपचक्रमे ॥ १० ॥ ततः प्रचुरसंरंभः शेष
कालानलसमन्वितः ॥ ब्रह्मांडं प्रोन्नयन्वक्त्रैर्ग्रसिष्णुः सचराचरं ॥ ११ ॥ चकंपे मेदिनी सर्वा स
पर्वतनदीनदा ॥ सद्वीपाः सागराः सप्त संगताश्च परस्परं ॥ १२ ॥ युगपत्तेपुरादित्या द्वादशास्व
करैर्भृशं ॥ प्रचेरुर्मारुताः सर्वे संतप्ता वह्निमोजसा ॥ १३ ॥

क्रमे संजिहीर्षां कृतवानित्यर्थः ॥ स्वरक्षादौ
स्वतंत्रो हेतुरहमेवेति दर्शयितुमितिभावः ॥ १ ॥ संजिहीर्षामेव प्रपंचयति त्रिभिः ॥ ततइति कालानलः प्रलयकालि ९
कोग्निस्तेन समन्वितः युक्तः ॥ चराचरैः सहवर्तमानं सचराचरं ग्रसिष्णु ॥ ११ ॥ ततश्च सर्वापि मेदिनी पृथ्वी च कं

कल्पवरहितनमितमर्थं । अतएवमनुष्यमहमनमंदेवमनुष्य । विलसल्लोकपन ॥ आत्मानाक्षेणतन्निवार
पिश्यानहस्तवमनसमाता । मातात्वंतथाविधंहृष्टवानीत्वानयनानितिनीत्वनुतिंस्करतिनेवविनेनुनं
तुलिवारसंक्रतनकलहस्तमर्थं ॥ २ ॥ त्वातिनेवाहनत्वंमतिहेविदंवरखिन चैतनत्वस्वरूपं त्रलतदंवरनिच
त्वंनमल्लिंत्वात्वंतुद्धि । अलितग्रथानूपत्रस्वविशिष्टेमर्थं । यद्दाचित् चैतनमनंवरं । वर्त्तयम्बनतन्वंतु
तनुवेत्वमतनसर्वज्ञस्वकविलगिवादृप । दृहयुत्तेनहान्मानंएनंव्यातांडनंदलं ॥ ३ ॥ म
[illegible]रिविदलनतीतनायंनत्वानरान्मतननिनवमननंपाता । दृह्यावतवकवनीके
तविलरकोनंनोन्नानिनीत्वतयन्नानिनुकिंविवेनु ॥ ४ ॥ देवाइत्थं मर्त्यक्लितोकविनयो
किनधोरवैनारक्रकुलनरयकार्त्वयनेधराम । नमनयादिपवाक्रि परिहत्यितनेन
पंचेदंवरनदेवविनेनंनतीक ॥ ५ ॥
द्वि । धंवरनिनुवलनत्वं । नयणादीनानंविति । चविइ
ववर्णनमाणधर्वादिनजकुवारक्लितोकनयनवगोनोत्वीनिविंचाधोरनोविल । यानुधोन नंनवि
व । [illegible]नोनंतिवन्नदादेहमंर्द्विवकद नेम्वांगेनइद्यंवरिद्धत्वितनाटेनिवंनेन
दे[illegible]रनयानत्रं मवर्धंमनवनसंनाकारंचंधेवनवोनोनिश्चिना । मःसमवेननमनुष्यकारनेनं
नि

॥रा॰ टी॥

॥ ॥

ये॥ ततश्च सप्तापि सागराः परस्परं संगता अदृश्यंत ॥१२॥ एवं प्रलयनिमित्ते जातेपि जगतः रक्षादिकर्तृत्वं तां
तम॰ ॥ श्रीरामोपदनात्प्रलयो माभूदित्याह ॥१३॥ ततः प्रतिशरणां रक्षितारं ॥१४॥ सोपि रामः क्रोधाग्निशम
नोपायमपश्यन् शिवमुपजगामेत्याह त्रिभि ॥१५॥ १६॥ १७॥ ततः किंवृत्तमिति तदाह ॥ अथेति ॥ वृषभध्वजः

सप्त१

ततो देवगणाः सर्वे सि[illegible]र्षयस्तथा ॥ पुरंदरं पुरस्कृत्य ब्रह्माणं शरणं ययुः ॥१४॥ सभीतः सह
तैर्गत्वा कैलाशं चंद्रमौलये ॥ न्यवेदयद्दशोपेण रामस्य च समीहितं ॥१५॥ भव शंकर देवेश पा
हि नो महतो भयात् ॥ कस्त्वामृते विभो स्तस्य कोपाग्निं समयिष्यति ॥१६॥ संवर्त्तोयमकस्मा
न्नो रामकोपात्प्रधावति ॥ का गतिः का दिशी कानां मस्माकं गिरिजापते ॥१७॥ अथ ब्रह्मवचः
श्रुत्वा सह तैर्वृषभध्वजः समागम्य ततः शीघ्रं वैकुंठहरिमंदिरं ॥१८॥ दृष्ट्वा तं गरुडारूढं विष्णुं लोका
भयप्रदं ॥ प्रणम्य च यथावृत्तं तस्मै सर्वं न्यवेदयत् ॥१९॥

शिवस्तथा ॥१॥ कैलाशाद्वैकुंठं समागत्य तं वि
ष्णुं गत्वा रामं निवारयिष्यामिति गरुडारूढं लोकाभयप्रदं लोकानां नास्ति भयमिति वदंतं ॥१८॥ १९॥ ततः स
र्वे जगद्रक्षणाय तं निवारयितुमेवोपजग्मुरित्याह समुपेत्येति ॥२०॥ ते च तादृशं रामं दृष्ट्वा नतु निवारयितुं स
मर्था ॥ आसन्नित्याह ॥ मा पापं नाशयति दिविषदो देवा ॥ अतीतमायां ॥ अतीतातिक्रांता माया येन स तं मा ॥३॥

नत्वंमनुष्योऽतिमानुषसमुद्रवंधनादिकर्तृत्वेपिनत्वंविष्णोरंससंभूतः॥ किंतुसच्चिदानंदात्मकोभगवान्॥ स
च्चिदानंदात्मिकास्पष्यक्तिरिति॥ मुमुक्षुःसच्चिदानंदात्मकस्वरूपोनराकारस्सर्वकारणभूतस्त्वमित्युक्तंभव
ति॥२२॥ तदेवरूपंविशदीकुर्वंति॥ मानुष्यनाटकमितिहेआर्तवंधो॥ आर्त्तानां॥ पीडितानांवंधु॥ रिवपीडाशांति
कर॥ अमेयरूपामयं॥ अमितरूपाभ्चुरंयन्नेरूपंतन्मानुष्यस्यमनुष्यभावस्यनाटकंयस्मिन्॥ तन्मानुष्य॥ नाट
कम्नतुमानुषमपितुसच्चिदानंदात्मकं॥ प्रमाणंचात्रपरमात्मानराकृतिरिति॥ मानवाकृतिरीश्वरइति॥ आनंद

मानुष्यनाटकममेयरूपामयंते विष्वाधमर्त्यनटनंचसदावनांकम्॥ रूपंयदेतदधुनाध्दृतमा
र्त्तवंधो तस्मैनमोस्तुसुतरामतिविश्वभूम्ने॥२३॥

यममर्त्तंयाहिभातितामनस्पादानंदमेवेति॥ आ
नंदमात्रकरपादमुखोदरादिरित्यादिश्रुतिस्मृतिवाक्यं॥ ननुकथंममैवरूपत्वतिमित्येतत्राह॥ विष्वादीति॥ यद्यस्मा
त्॥ अवनांकं॥ अवनरक्षनस्यांकं॥ चिह्नंयस्मिन्तत्॥ विष्वाधमर्त्यनटनंविष्णुरादि॥ येषांतेचतेऽमर्त्याश्चतेषांनट
नंचेष्टनंजगत्पालनादिरूपंभवति॥ अधुनायदेतद्दैशपात्म्यलक्षणंरूपंध्दृतंतस्यचनटनंयतोभवतीतिसंवध्यते॥
एतेनविश्वस्यतदधिष्ठातॄणांचांतर्यामित्वंश्रीरामस्येत्युक्तंभवति॥ तस्मै॥ सर्वांतर्यामिणेसुतरांनमोस्तुध्दृतमि
त्यनेनप्राप्तंविकारित्वं॥ वारयत्राह॥ अतिविश्व॥ भूम्नइतिविश्वमति॥ क्रांतांति॥ विश्वः॥ सचासौभूमाचतथातस्मै

विश्वव्यापकत्वेपिविकारास्पर्शायेसमर्थः॥ विश्वाधंतर्यामित्वंश्रीरामस्येतिस्मृतिरप्याह॥ विश्वाधनुमदेहेषुप्रविष्टोदे
वत्ताभवत्॥ मत्स्याद्यधमदेहेषुस्थितोभजति देवताइति॥ २३॥ एवंभक्तस्यश्रीरामस्यनामरूपयोरानंत्यादियत्ताभावं
सूचयन्नाह॥ जानीमहइति॥ तवनामरूपेचेयत्तायानजानीमहे॥ यतस्त्वमेकएवनिजेनस्वीयेनभास्वत्प्रकाशरूपे
णाविश्वंविदधासिधारयसि॥ विभोप्रकाशरूपेणसर्वत्रव्यापिकेत्वयिवयंभुवनेश्वरात्रपिकेस्मः॥ त्वांचनविस्म
तत्रहर्षात्तनभवसीतियथानुरूपंभोमंरजः नभसिस्थितमपीयन्नभोरूपंइतिनजानातितद्वत्स्वयंभाव॥ तवन

जानीमहेतवननामनचापिरूपंभासैकएवविदधासिनिजेनविश्वं॥ कास्मोवयंत्वयिविभोभुवने
श्वसाकंविस्मोनचैवनभसीवरजोणुभौमं॥ २४॥ वाचःस्पर्शंतुकमिमावहधागणानस्त्वेतानिवा
क्वनुममांसिलगंत्वमूर्तैः॥ तस्मादतर्क्यपरमार्थसदेवयास्मैकस्मैचिदेवमहतेप्रभवेनमोस्तु॥ २५॥

काशरूपेकदेशेसर्वंविश्वंप्रतिष्ठितं॥ तत्रभुवनानितेषुस्थितास्त्रस्तेषुद्रावयंभवतोमहानुभावस्यविश्वाश्रयप्र
काशाधरस्यनामरूपयोरियत्तयापरिज्ञानेक्कसमर्थाइति॥ २५॥ मीमांसादीनिशास्त्राण्यपीयत्तयात्वांप्रतिपाद
यितुंनशक्नुवंतीत्याहः वाचइति॥ हेऽमूर्तेप्राकृतमूर्तिरहितराहितः॥ प्राकृतैर्हूमैः सतुदिव्यगुणोदधिरिति
स्मर्तेयद्वा॥ अकारोवासुदेवः॥ समूर्त्तिविग्रहोयस्यतत्संबुद्धो॥ अमूर्तेविष्णोरंतर्यामिन् विष्णो॥ पालनेच्छातुसदे

वर्त्ततेभवांस्तुविष्णोरंतर्यामित्तस्तत्त्वपालनमेवोचितंनतुसंहारइतिभावः॥इमांवेदरूपांवाचः॥बहुधागृणंतोपिकं
स्परशंतुनकेमपीत्यर्थः॥एतानिवामनांसिकृतयुगेतुकसंगमाभुवंतुनुशब्दोवितर्कोर्थः॥अयंभावः॥यदामीमांसा
दिलक्षणांवाचंरुद्रादिरूपेणबहुधास्थितंत्वांप्रतिपादयंत्योपितवसाक्षिदानंदलक्षणायस्त्रिगुणरहितायामूर्त्तेः
परिमाननत्वयाप्रतिपत्तुंनशक्नुवंतितदामनोप्रवीणानांप्राकृतानांकथंप्रवृत्तिरिति॥श्रीएमतत्त्वस्यैवंवचनाद्यगोचर
त्वेसिद्धेफलितमाहुः॥तस्मादितिहे॥अतर्कपरमार्थयस्मात्त्वत्तत्त्वप्रतिपादनेकर्त्तुमशक्यंतस्माद्यस्मैविदेवम

विधिःकथंत्वंरजसाविहीनोसत्त्वेनहीनस्तुकथंमुरारिः॥स्वयंप्रकाशस्तमसःपरस्ताद्विभ्राजमानःपु
रभित्कथंत्वं॥२६॥मर्त्येष्वमर्त्येषुतथेतरेषुस्थूलेषुसूक्ष्मेषुचराचरेषु॥दृष्टेष्वदृष्टेषुजगत्स्वरूप
मभवत्प्रभून्नोभवितासमस्ते॥२७॥

निर्वचनीयायमहत्तेसर्वोत्कृष्टायप्रभवेमहाराजायनमस्कुर्मइ
त्यर्थः॥२५॥ननुयःकश्चिज्जगदीश्वरः॥सएवब्रह्मादिरूपेणावस्थितस्तस्यचब्रह्मादिरूपमेवरूपं॥कुतोनस्यादि
त्याशंक्याहुः॥विधिरितिरजसारजोगुणेनहीनोरहितः॥त्वंकथंविधिर्ब्रह्मासिसत्त्वेनगुणेनहीनस्त्वंमुरारि
र्विष्णुः॥तमसःपरस्ताद्विभ्राजमानस्त्वंकथंपुरभित्छिवोसि॥त्रिगुणसंबंधरहितत्वेनत्वंब्रह्मादिरूपोसी
त्यर्थः॥त्रिगुणसंबंधरहितत्वेहेतुमाहुःस्वयंप्रकाशइति॥अनन्याधीनप्रकाशइत्यर्थः॥२६॥एतत्त्वमेवंभूतोऽत ॥५॥

त्वत्समः ॥ कोपि नासीत्याह ॥ मर्त्येष्विति मर्त्येषु मानुषेषु ॥ अमर्त्येषु देवेषु तथेतरेषु नागादिषु ॥ किं बहुनोक्ते-
न ॥ चराचरेषु जगत्सु मध्ये ते तव समो नास्ति नाभून्न भविता ॥ त्रिष्वपि कालेषु तव समः ॥ कश्चिन्नास्तीत्यर्थः ॥ श्रु-
तिश्चैवमेवाह न तत्समश्चाभ्यधिकश्च दृश्यत इति ॥ ७ ॥ ननु सच्चिदानंदलक्षणस्य मम कश्चित्समो मा भवतु
विश्वरूपस्य मे समा ब्रह्मादय ॥ संत्येवेत्याशंक्य विश्वरूपस्यापि तव समः ॥ कश्चिन्नास्तीत्याह ॥ क्रोध इति हि यस्मा-
द्विश्वमूर्तेर्जगद्रूपस्य ते तव क्रोधो रुद्रः संहारकत्वसाम्यात् ॥ एषः प्रजानां पतिर्ब्रह्मा तव कामः उत्पादकत्वसाम्यात्

क्रोधो हि रुद्रस्तव विश्वमूर्तेः कामः प्रजानां पतिरेष एव ॥ मायी रमेशः स्वयमेव मोहो ह्येवं त्वदाज्ञानुच-
राः स्थितास्मः ॥ ८ ॥ मोहस्तवानंदघनस्य कस्माद्धेयोऽद्वितीयस्य कथं च रागः ॥ कीदृक् तवेमां विनिवारयेत्कः
स्वीयां विनैकामिमनानुकंपा ॥ ९ ॥

रमेशो विष्णुः शेषशायी स च स्वयमेवाभिन्नांशः एव तव मोहो निद्रापालक-
त्वसाम्यात् ॥ कीदृशः मायी माया कृपास्यास्तीति मायी माया दंभे कृपायां चेति कोशान्मायाशब्दः ॥ कृपावंचीवयं
देश्यास्त्वदाज्ञानुचराः ॥ येनहृचनमात्रं किं नु स्थितास्मः ॥ कदा भवान्नियोक्ष्यतीति प्रतीक्षामहे इत्यर्थः ॥ ८ ॥ ननु ममा-
प्येवं क्रोधादिपुरुषत्वे कथं ब्रह्मादिभ्यो विशेषोस्तीत्याशंक्य क्रोधादीनां लीलाहेतुत्वादित्याह ॥ मोह इति ॥ आनंदघन-
स्यानंदपूर्णस्य तव मोहः उपतापहेतुः ॥ कस्मादपि नास्ति ॥ न ह्यानंदघने मोहस्संभवंतीत्यर्थः ॥ रागो द्वेषश्च नास्तीत्य-

ह.टी.

६

मत्रहेतुमाह॥ अद्वितीयस्येति समाधिकरहितस्य समे द्वेषो हि अधिके वा रागो भवतीति प्रसिद्धं॥ नन्विदानीमेव
क्रोधेन संहर्तुमुद्यतस्य मे कथं क्रोधादिरहितत्वमिति चेत्तत्राह॥ क्रीडामिति॥ इमां जगत्संहाररूपां॥ स्वीयां स्वसंबंधि
नीं स्वकामस्साधारणीं॥ २६॥ अनुकंपयैव भवता संहारो न कर्त्तव्य इति प्रार्थयंते॥ आत्मानां तन्निवारणाय अशक्यतमा
हुः॥ उन्मेषमात्रमिति॥ अंगभेवादुकानि तेषामनेकब्रह्मांडानामेव सिद्धा सृष्टिः॥ यस्य तवोन्मेषमात्रं प्रलयोपि निमे
षमात्रमतयोरुन्मेषनिमेषयोः॥ साम्यं स्थितिः पालनं॥ एवं आह महानुभावं त्वां वयमंडकैकांतरवर्त्तिनो तिरस्

उन्मेषमात्रं तव सृष्टिरेषा निमेषमात्रं प्रलयोपि यस्य॥ तयोश्च साम्यं स्थितिरंडकानां कथं तिरस्कुर्
वयमीश महे त्वाम्॥ २०॥ शुक उवाच॥ ततोन्थिता मजुममीसमुदीक्ष्य भूयो भीतास्ततोपि सुतरामःमरा
स्सर्वे॥ विस्मयतत्वमहमीहमितमखिलं निरीहात्मन्स्त्वीव भूवरा विलाइव निर्विकाराः॥ २१॥ दूरात्तव या प्रलयो
न कर्त्तव्य इति नियोक्तुं कथमीश्महे॥ प्रार्थयतुं कथं मपि प्रभवाम इति भावः॥ एवं स्तुत्वा तूष्णीं भूतास्तिष्ठान्ह ततो
न्थिता इति॥ न त्वं चेतनाचेतनविग्रह॥ अमल त्वामयं जगच्च तत्वेन त्वोन्थिता जाता इत्यर्थः॥ अमी सर्वे अम
रा देवाः॥ प्रभुं एमं समुदीक्ष्य भयविह्वलनेत्रैः॥ समुदीक्ष्य ततोपि पूर्वभया दपि भीता भूयो भूयो वभूवुस्तत्र च त
दिदं जगत्तव महद् ममकनामात्व ममक नामाहमिमारविलं विस्मयनिरीहा निश्चेष्टाः॥ सततमविकारा इव शिथिलमय ६

त्वाबभूवुः ॥ २१ ॥ ततः किं वृत्तमित्यपेक्षायामाह ॥ अथेति ॥ अथ देवस्तुत्यनंतरं ॥ विष्णुपुरोगमा विष्ण्वादयः ॥ तस्य राम
स्य प्रभावमित्थं दृष्ट्वा लब्धमानसं येषां ते तथा बभूवुः ॥ २२ ॥ २३ ॥ अथ श्रीरामं प्रसादयितुं शंकरः स्तौति सर्वा
पदुद्धारणमिति हे सुरनाथ ॥ अमी निगमा वेदाः वेदानामपि तत्त्वस्थितत्वादमी त्वं गृणन्ति ईदृशः ॥ यमेकमशा
धारणं सर्वापदुद्धरणं सर्वापदां शकं सुखादि भुक्तेः स्वर्गादिसुखस्य निदानं कारणं अशेषसंपदां ॥ मूलं कारणं पो
धर्मस्तस्यापाकं रं च यं निगदंति ॥ कथयंति स त्वमेवासि वेदपूर्वभागे धर्मरूपेण त्वमेव प्रतिपाद्योसीति भावः ॥ वेदोत्त

अथ ते सोमसमास्ताद्यदेवा विष्णुपुरोगमाः ॥ तत्प्रभावं च दृष्ट्वेत्थं बभूवुर्लब्धमानसाः ॥ २२ ॥ स्तंभीभू
तेषु सर्वेषु शंकरः करुणान्वितः ॥ प्रसादयितुमेवैनं तुष्टाव परमेश्वरं ॥ २३ ॥ श्रीशंकर उवाच ॥ सर्वाप
दुद्धरणमेकमशेषसंपन्मूलाकारं च निगमा निगदंत्यमीयं ॥ सोसि त्वमेव सुरनाथ सुखादिभुक्तेर्भक्तेश्च त
न्भजतामिह यो निदानम् ॥ २४ ॥

रभागेण च त्वमेव प्रतिपाद्योसीत्याह ॥ भजतामिति भजतां सेवमानानां मुक्ते
श्च निदानं त्वमेवासि ॥ श्रुतिश्चैवमेवमेवाह ॥ सर्वे वेदा यत्पदमामनंतीति ॥ २४ ॥ ननु कथमहमेव वेदप्रतिपाद्यः इं
द्रादीनामपि तत्रोपपादनादित्याशंक्येंद्रादीनामपि त्वदपत्वादित्याह ॥ एके इति ये अभिक्षयः चांद्रायणादिभिः
के परे क्रतुभिः अग्निष्टोमादिभिस्तथान्ये होमैः ॥ नित्याग्निहोत्रमर्चनं ॥ देवपूजनमस्वाध्यायो वेदाध्ययनमः ॥

॥रा॰भी॥

॥७॥

दानंभसत्वनिवृत्तिपूर्वकंपरस्वतोपयादनम॥ यमइंद्रियसंयमः॥ एतदादियोगैरुपायैर्बहुधा बहुप्रकारतयें
द्वारिकदेशास्थितंत्वांभजंतिसेवंतेकतिचिद्धिरलाश्वरसिकाएकयाभक्त्यैवननु॥ पापांतरगात्वांपरमंसर्वोत्कृ
ष्टएवमुख्यमेवभजंति॥२३॥ यतः॥ परमोत्कृष्टस्त्वंकृपादया॥ सर्वेत्वाद्विभूतयस्तस्मादेतद्विधेहीति॥ आर्य
पतेस्वामामइति॥२४॥ तेषुभक्तेष्वाराभेयस्यतत्संबुद्धौत्वदंघ्रिसरसीरुहषट्पदानांत्वदंघ्रिकमलभ्रमराणांनो
ऽस्माकंत्वत्कृपाऽद्ययंजातंततस्तस्माच्छीघ्रमभयंकुरुतवनाम्नोपिभयनिवर्तकत्वान्वेवक्तानांत्वत्कृपाऽद्य
मनुचितमेवेत्याहरजनीचराचएवदुर्वनानितेषांकल्पांतपावक॥ प्रलयकालिकोग्निस्तद्वग्निदस्य

एकेतपोभिरपरेऽक्रतुभिस्तथान्येहोमार्चनाध्ययनदानयमादियोगैः॥ भक्त्यैकएवकतिचिद्विरलास्स
देवत्वामेवपरमंबहुधाभजंति॥२५॥ स्वारामरामरजनीचरदुर्वनानांकल्पांतपावकनिजोत्तमना
मधेय॥ नाथत्वदंघ्रिसरसीरुहषट्पदानामस्माद्भयंत्वमभयंकुरुनस्तवोद्राक॥२६॥

स्वरूपोत्तमंनामधेयंनामेतिनामभागंयस्यसतथातत्संबुद्धौ॥२७॥ ननुऽनेकलीलाविग्रहवतोममकीदृ
शात्कृपाऽद्ययंजातमास्तिमयाचमत्रकिंप्रतिकर्तव्यमितिचेतत्राहविश्वमितित्वबवपुर्विश्वंभवतुमंदतीते॥ तस्मा
द्विश्वरूपादतीतंयत्कृष्णतद्वानचरूपमस्मकंप्रमदस्विशाहंहिषमेश्वरंहपंवास्तुनास्तीदानींपरीक्षयाप्रयोजन
मित्यर्थः॥ अमीसर्वेवयंदेवायस्यतपस्तेजसाविवसीकृता॥ अविवसाविवसाः॥ संपद्यमावास्तदेतद्विश्व ॥७॥

रूपमुपसंहर ॥ २६ ॥ त्वत्त एव सर्वेषां क्षेमं भवतीति प्रसिद्धमुपसंहारेण त्वया माभवात्वित्याह क्षेमायेति श्रुति
भिर्वेदैर्जगतां जगदंतः ॥ पातिनां सर्वेषां जीवनां क्षेमं कल्याणं सदा त्वत्तो भवतीत्युक्तं ॥ यदि त्वत्तस्तस्मात्त्व
त्तः ॥ त्वद्रूपाश्रितानां त्वद्भक्तानामस्माकमेव भवति तत्रात्र वयमसमर्थाः किं कूर्मः यस्य तव प्रसादाद्भक्ता भ
वाब्धिं संसारसागरमपि गोष्पदवत्तरंति एवं त्वद्भक्तानां संसारतरणमपि सुकरं वयमपि त्वद्भक्ता एवातो

विश्वं वपुर्भवतु वा तदतीतमस्माद्धृदि यमन्यदपि वास्तु यतो भयं तत् ॥ तस्मान्न देव तदुपसंहर
विश्वरूपं यत्तेजसा वयममी विवशीकृतास्मा ॥ २७ ॥ क्षेमं यतो हि जगतां श्रुतिभिः सदोक्तं त्व
त्तो भयं यदि ततस्त्वदुपाश्रितानां ॥ कूर्मः किमत्र करुणामय त्वत्प्रसादाद्भक्ता भवाब्धिमपि
गोष्पदवत्तरंति ॥ २८ ॥

स्माकं भयमनुचितमिति भावः ॥ संसारतरणोपायभूतो परमेश्वरः ॥ स एव दुः
त्वमोचनाय प्रार्थनीयो न त्वहमिति चेत्तत्राह रामेति हे राम त्वमेव भगवत ईश्वरो नामः ॥ वयं च ते तुभ्यमेव
प्रणता ॥ नान्यस्मै यतः परमार्थदृष्ट्वा त्वद्भिन्नैवैकनिलेया ॥ त्वद्भिन्नं विश्वरूपं तत्र निलयं स्थानं येषां
ते तथा ॥ भगवन्नित्यत्र दीर्घाभाव आर्षः ॥ एवं भेदमुक्त्वा परमतमुपन्यस्यन्निरोति सार्द्धेन श्लोकेन ॥ इति
हे परमेश्वर परस्परात्वत्तो मी जीवाः ॥ पृथक् कथं स्युर्न स्युरेव ॥ यथा व्योम्न आकाशात्प्रमितात्त्व

॥रा॰गी॰॥

॥८॥

कोशाकाशाः छद्राज्ञोनावछिन्नाकाशाः प्रथङ्मस्यैव ॥ ३९ ॥ केति तत्वसरणेः ॥ तत्वानां जीवनं सरणिर्ग
मनं येन स तस्मात्संसारमार्गान्निदूरगोतिदूरवर्तीत्वं क्व तत्वाटवीपरिचराः ॥ संसारवनचारिणो वयं जीवा
क्वास्मदादीनां सर्वेषां जीवानामीशस्य तव महदंतरमित्यर्थः ॥ अतत्वज्ञक्तिमात्रमवलंब्याथ्वितास्मै
चिदेवानिर्वचनीयाय महसे स्वप्रकाशाच्चिदानंदस्वरूपाय तुभ्यं केवलमों नमः इति विदध्मः कुर्म्मः ॥ न तु स्वरू
पनिरूपनिरूपणे समर्थाः ॥ इति भावः ॥ ४० ॥ केवलं नमस्कुर्म इत्युक्तं प्रपंचयति नवभिः ब्रह्मणे तुभ्यं नमः परस्मै

राम त्वमेव भगवन्परमात्मा वयं ते त्वद्दैभवैकनिलयः परमार्थहस्त्वा ॥ व्योम्नः प्रथङ्कथममीषमि
नाज्ञकोशाथ्रकाशास्ततः परतरात्परमेसुरस्तुः ॥ ३९ ॥ कामीशतत्वसरणेरतिदूरगस्त्वं तत्वा
टवीपरिचराद्विवयं क्व चास्मः ॥ त्वद्भक्तिमात्रमवलंब्य तथापि तुभ्यं कस्मै चिदेव महसे नम ॥ ४० ॥

इति विशेषणं प्रसिद्धब्रह्मनिरासार्थं ॥ को दशाम विश्वयोनये विश्वोत्पत्त्यसाधारणकारणाय विश्वयोनये इ
त्यनेन क्षीणमस्य मनोवाङ्मानि भूतानि जायंते इति श्रुत्युक्ततटस्थलक्षणमुक्तं भवति सत्यं ज्ञानमनंतं ब्र
ह्मेति श्रुत्युक्तस्वरूप रामस्य गुणान्भूत्वेनीलाधर्मपराः ॥ एतच्च तुष्टयं निर्मंसच्चिदानंदविग्रहमिति स्मृत्युक्तं
स्वरूपलक्षणमाह सच्चिदानंदरूपायेति ॥ एतत्कालोपात्तरूपं प्रणमति स्वरूपायेति वेधसे हिरण्यगर्भरूपा

यः ॥ ४१ ॥ श्रीविष्णुरूपेणावस्थितं ॥ श्रीरामं प्रणमति नमः इति जगतो मूलस्य प्रकृत्यादेः कंद आश्रयः ॥ निरं
तरो नंदस्थासौ मुकुंदश्च स तथा तस्मै न केवलमानंदरूपोपि तु जगत्रयपकृतानंदीपीत्याह ॥ जगत्रयपकृतानं
दमूर्तये इति जगतां त्रयं जगत्रयं ॥ आनंदोपपासां कृतानंदा जगत्रयस्य कृतानंदा मूर्त्तिर्यस्य स तस्मै एवमानंदरू
पत्वे लिंगमाह शुभमूर्तये इति शंभुमूर्त्तये इति पाठे शुद्धसत्वात्मकरूपिणं महाशंभुं प्रणमतीति द्रष्टव्यं ॥ ४२ ॥ ज

नमोस्तु ब्रह्मणोनंतं भं परस्मै विश्वयोनये ॥ सच्चिदानंदरूपाय विश्वरूपाय वेधसे ॥ ४१ ॥ नमो निरंत
रानंदमूलकंदाय विष्णवे ॥ जगत्रयपकृतानंदामूर्त्तये शुभमूर्त्तये ॥ ४२ ॥ नमोस्तु निर्गतोपाधिस्व
रूपायामुदात्मने ॥ नमो ब्रह्मेशपूज्याय सर्वदेवमयाय च ॥ ४३ ॥

गत्रयेस्मनेनप्रतीतमानंदस्यानि
त्यत्वं वारयन्नाह नमस्वरूपाय निर्गत उपाधिर्यस्मात्तादृशं स्वरूपं यस्य स तस्मै मुदात्मने ॥ आनंदस्वरूपायं
नंत ॥ आनंदस्वरूपस्त्वमतो ब्रह्मादयस्त्वमेव भजंतीत्याह ब्रह्मेशपूज्यायेति सर्वे देवजकास्त्वत्पूजका एवे
त्याहः ॥ सर्वदेवमयाय चेति ॥ ४३ ॥ पुरुषावतारं श्रीरामं स्तौति ॥ उत्पत्तिस्थितिसंहारकारिणं इति ॥ ४४ ॥ एकां
शेनततविश्वाय ॥ एकदेशस्थितविश्वायेति विश्वातीताय विश्वव्यतिरिक्ताय महते तेजोरूपायात एव त्रि
पादूर्द्ध्वे स्थिताय ह्विभ्यतेरूर्द्धं पतन्साकेतं तत्र स्थिताय ॥ ४५ ॥ ननु वश्रीतीतस्य कथं विश्वमयत्वमित्याशंक्या

॥रा॰ गी॥ त्विंस्यशक्तित्वादित्याह॥ अनंतशक्तयइति॥ अनंताशक्तयो यस्यसतस्मै किं तर्हि प्रयोजनोद्देशेन विघ्नमत्वं
॥८॥ नेत्याह॥ नित्यतृप्तायेत्वेहेतुमाह॥ अलुप्तशक्तयइतितत्रहेतुः स्वतंत्रायेति॥ ४६॥ अचिंत्यायेति॥ अचिंत्वेहे
तुः॥ केवलज्ञानमूर्तये॥ इतिकेवलज्ञानरूपामूर्तिर्विग्रहोयस्यसतस्मै सन्मात्रायेइतिसतामुपासकानां मात्रा
येविषयभूतायेध्येयायेत्यर्थः॥ ४७॥ अतएवविद्यायेज्ञानरूपिण्यैप्रपंचरूपिण्यै जगत्कारणभूतायैनिष्प्रपं

उत्पत्तिस्थितिसंहारकारिणोत्केशहारिणो॥ नमःसहस्रशिरसे पुराणपुरुषाय ते॥ ४४॥ एकांशी
भूतविश्वायत्रिपादूर्ध्वस्थिताय च॥ विश्वातीताय महते नमो विश्वमयाय च॥ ४५॥ अनंतशक्त
ये तुभ्यं नित्यतृप्ताय वै नमः॥ अलुप्तशक्तये तुभ्यं स्वतंत्राय नमो नमः॥ ४६॥ अचिंत्याय नमस्तुभ्यं केव
लज्ञानमूर्तये॥ सन्मात्राय अविद्यायै सीतायै राघवाय च॥ ४७॥ नमः प्रपंचरूपिण्यै निष्प्रपंचस्वरू
पिणे॥ नमो ध्यानस्वरूपिण्यै योगिध्येयात्मरूपिणे॥ ४८॥ परिणामप्रदायिन्यै परिणामाभावाय च नमो नमः॥ कू
टस्थबीजरूपाभ्यां प्रकृत्यै पुरुषाय च॥ ४९॥

चरूपिणे जगद्व्यतिरिक्तस्वरूपाय॥ ध्याने स्वरूपयस्या अस्तीति ध्यानरू स्व
पिणी तस्यै योगिनां ध्यानरूपत्वेन श्रीरामतत्वप्रकाशिकायेइति भावः॥ योगिभिर्ध्येयमात्मनो रूपं यस्यसतस्मै
४८॥ प्रकृतिपुरुषरूपत्वेन सीतारामौ प्रणमति॥ परिणामेति परिणामो विकारोऽस्यास्तीति परिणामा प्रकृतिः अ ॥९॥

परिणामापुरुषविमोचनौ निस्रौचनामांप्रधानरूपामांडक्कार्यमेव विप्ररणोति प्रकृत्यैपुरुषायचेति ॥ ४९ ॥
ब्रह्मरूपत्वेनवाशाभंस्तीतियद्विवर्त्त इति ॥ शब्दश्चार्थश्च द्वार्थौ ताभ्यां तीयस्य तदिदं विश्वं यस्मिन्परावकाशे ब्र
ह्मणि अनाद्येव जगदुत्पत्तिमत्वेनातात्त्विको न्यथाभावो विवर्त्त इति केचांचिद्विजंभते भासते स पराकाशस्तं
त्वद्विभूतिरित्यर्थः ॥ अतस्तदखिलं जगत्त्वच्छक्तिशक्तिकार्यत्वाज्जगत ॥ ५० ॥ शक्तेः कला आह ॥ इच्छेति परा विद्यो
पासना अपरा अविद्या कर्मात्मिका सत् सूक्ष्मम सत्स्थूलं तयोर्व्यक्तिः सृष्टि ॥ अव्यक्तं प्रधानमेते सर्वे त्वच्छक्तेश्चेत

यदिवर्त्त इदं विश्वं शब्दार्थाकृतिजृंभिते ॥ सत्वमेव पराकाशस्त्वच्छक्तिरखिलं जगत् ॥ ५० ॥ इच्छा ज्ञानं
क्रिया चैव विद्याविद्या परापरा ॥ सदसद्व्यतिरव्यक्तं त्वच्छक्तेरखिला कला ॥ ५१ ॥ प्रवृत्तिश्च प्रतिष्ठा
च विद्या शांतिस्तयोन्नमा ॥ शांत्यतीता परा सूक्ष्मा समना चोन्मनेति च ॥ ५२ ॥

नाया ॥ कला अंशा प्रकृ
तिरिति प्रवृत्तिः ॥ कर्मसु प्रवर्तनं प्रतिष्ठते ऽस्मिन्निति प्रतिष्ठा कर्मजन्यतत्तल्लोकस्थिति ॥ विद्या ज्ञानं तज्जन्यवि
षयनिवृत्ति ॥ शांतिः कीदृशी उन्नमा ततः ॥ परा सूक्ष्मा शांत्यतीता सस्वरूपस्थितिरूप समना सविकल्पकस
माधिरूप उन्मना निर्विकल्पकसमाधिरूपा ॥ एतत्सर्वं नानाप्रकारेणायदृश्यते तत्सर्वं सीता विजासितं तत्त्वे
वनवानुग्रहरूपया शक्त्या त्वदेकांत्वत्समानाकारत्वमपिलभ्यते प्राप्यते तेन वयं कैरितिशेष ॥ ५२ ॥ प्रपंचस्यादेः

सीताविलसितत्वमुक्त्वासद्योजातादिरूपेणरामस्यतदधिशतत्वमाहः॥सद्योजाताऽसीतिहेरामसद्योजातशब्दा
भिधेयेनमहेश्वरेणाग्रजन्मेः॥अग्रजन्मीशिखेनियमयसिअग्रजन्मेरित्यादेर्द्विजातीयार्थेयथीकीदृशः॥क्षेत्ररक्षकः
क्षेत्रस्यदेहस्यरक्षकः॥वामदेवः वामदेवनामामहेश्वरस्त्वंवासानानतत्त्वंवासनारूपांतनुंशरीरमास्थितस्सन्
प्रतिष्ठांनियमयसि॥५४॥अघोरनामामहेश्वरस्त्वंतेजसांनिधिः॥प्रकाशानांनिधिस्सागरः॥विद्यांनियमय

सीताविलसितंसर्वंनानाकारेणदृश्यते॥तयानुग्रहस्यान्तेचतत्त्वंदेकमपिलभ्यते॥५३॥सद्योजातः
अग्रजन्मेस्त्वमीशिखेक्षेत्ररक्षक॥वामदेवःप्रतिष्ठायावासनातनुमास्थितः॥५४॥विद्यानामप्यघोरस्त्वं
तेजसांनिधिरव्ययः॥प्राणास्तत्पुरुषःशांतेस्त्वतत्त्वानांपंचवाहक॥५५॥ईशानःशांत्यतीतायव्यापको
व्योमविग्रहः॥विश्वश्चसमनायाश्चमुन्मनायानिरंजनः॥५६॥

सितत्पुरुषनामामहेश्वरस्त्वंप्राणाः प्राण
रूपः॥सन्शांतिनियमयसितत्त्वानांमहाभूतानांपंचस्यब्रह्मांडस्यवाहकः॥५५॥सन्शांत्यतीतांनियमजसि
विश्वः॥विश्वरूपः॥सन्समनांनियमजसित्वंनिरंजनः॥उपाधिरहितः॥ब्रह्मरूपः॥उन्मनांनियमयसि ५६
सीतारामयोरभेदमाह॥सीतेतिसीताशक्तिः॥अपराद्वितीयाश्चचलानित्यात्वन्मूर्तिर्विग्रहः॥अतएवाचिं
त्यामलिनचित्तैर्ध्येयंतथापितुमयाक्ता॥५७॥एवंश्रीसीतारामयोरभेदमुक्त्वैकरूपयोरेतावविभूतपरस्माह

[ईशानाभिधेयमहेश्वरस्त्वंव्यापकः ४]

सीतारमाभवान्विष्णुः सीतागौरीभवाञ्छिवः ६८ १

सीतेति ॥ ५८ ॥ ५९ ॥ ६० ॥ जगत्प्राणोवायुः सदागतिस्तन्पत्नीसर्वसंपत्तिः ॥ कुबेरपत्नी ॥ ६१ ॥ ऐश्वर्यमीश्वरता

सीताशक्तिरचिंत्येयंत्वन्मूर्तिरचलापरा ॥ ५७ ॥ सीतारमाभवान्विष्णुः सीतागौरीभवांछिवः ॥
सीतास्वयंहिसावित्रीभवान्ब्रह्माचतुर्मुखः ॥ ५८ ॥ सीताशचीभवानिंद्रः सीतास्वाहानलोभवा
न् ॥ सीतासंहारणीदेवीयमरूपधरोभवान् ॥ ५९ ॥ सीतातुनामसीदेवीनिर्ऋतिस्त्वंरघूत्तमः ॥
सीतातुभार्गवीदेवीवरुणास्त्वंजगत्पते ॥ ६० ॥ सीतासदागतिर्देवीजगत्प्राणस्वयंप्रभोः ॥
सीताहिसर्वसंपत्तिःकुवेरस्त्वंसवोदितः ॥ ६१ ॥ ऐश्वर्यजानकीसासादीशानस्त्वंमहेश्वरः ॥
सीतातुरोहिणीदेवीचंद्रस्त्वंलोकसौख्यकृत ॥ ६२ ॥ सीतासंज्ञाभवान्सूर्यःसीतारात्रिर्भवा
न्दिनः ॥ सीतावदक्षिणादेवीयज्ञमूर्तिर्भवान्विभो ॥ ६३ ॥ सीताभुक्तिर्भगवतिभोगस्त्वंपुरु
षोत्तमः ॥ सीतेयंमुक्तिरमलामोक्षस्त्वंमकुतोभयः ॥ ६४ ॥ सीताशक्तिर्जगद्धात्रीशक्ति
मंस्त्वंमहेश्वरः ॥ सीतादेवीमहाकालीमहाकालस्त्वमेवहि ॥ ६५ ॥

॥ ६२ ॥ संज्ञासूर्यभार्या ॥ ६३ ॥

यज्ञः यज्ञनामाविष्णुः दक्षिणातद्भार्या ॥ ६४ ॥ सीतेतिस्त्रीत्वेननिर्दिष्टामुक्तिः सीताविमुक्तिः पुंस्त्वेनानि
र्दिष्टोभोगः श्रीरामस्येतिवोध्यं ॥ ६४ ॥ जगद्धात्रीजगद्धारणाकर्त्रीशक्तिः ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५

॥ [illegible] ॥ अथ विभूतिवर्णनमुपसंहरति किमिति हे राम तव विभूतिवर्णनेन बहुधोक्तेन किं तत्परब्रह्म त्वमेतावतैवा
॥ ३ ॥ लमिति ६६ प्रकारांतरेण विभूतिसाम्यमाह ॥ सर्वत्रेति सर्वदेहेषु सर्वलोकेषु ये सर्वे देहास्तेषु षड्डूक्रा
णि धारयतीति तथा कुंडलनीशक्ति ॥ सीता चक्रांतश्चक्रा मरणां मध्ये वर्त्तमानाश्चिन्मूर्त्तेः श्वेतन्मविग्रहः

किमत्र बहुधोक्तेन राम त्वं ब्रह्म तत्परं ॥ त्वद्विभूतीरियं सीता द्विश्वाकारादि उच्यते ॥ ६६ ॥ स्त्री त्वहं
सर्वलोकेषु यत्तत्सर्वं हि जानकी प्रभा ॥ प्रनामं लांछितं वस्तु यत्तत्सर्वं भवान् विभो ॥ ६७ ॥ सर्वत्र
सर्वदेहेषु सीता षड्डूक्रधारिणी ॥ तथा त्वमपि चक्रांतश्चिन्मूर्त्ति विश्वभासक ॥ ६८ ॥ स्त्रीपुंभा
दिरहितं तत्त्वमेव परमं पदं ॥ त्वन्तो विभाति वेदांता मनसा सह वागपि ॥ ६९ ॥ सत्यानंदस्त्वमेवा
सि यत्र भेदो न विद्यते ॥ तव लीलाप्रपंचोयं तत्त्व चाहमिति त्रिधा ॥ ७० ॥ श्रीरामायनमः

विश्वभासकः ॥ विश्वप्रकाशकः ॥ ६७ ॥ यत्परमं पदं तत्त्वमेन कीदृशं स्त्रीपुंभावादिरहितं ॥ स्त्रीभावेन रहितं पुरु
षभावेनश्च रहितं मानवाकृतिरीश्वर इति परमात्मा नराकृतिरित्युक्तेः ॥ स्त्र्याकारसदृशाकृतित्वात्स्त्रीभावे
न रहिता जानकी पुरुषाकारसदृशः ॥ ६८ ॥ शाकृतित्वात् पुंभावेन रहितो भवानिति भावः ॥ एवं रूपं त्वां वेदांता
अपि साकल्येन वर्णयितुमसमर्था स्तत्रास्मदादीनां का शक्तिरित्याह ॥ त्वत्त इति वेदांतास्त्वत्तो विभाति ॥ त्वां ॥ १९ ॥

भीतवत्प्रतिपाद्यंत्वीत्यर्थः॥ वाक्वाचामधिष्ठात्रीदेवतामनसामहापित्वत्तोविभेतितत्रास्माकंकाशक्ति
रितिभावः॥६९॥ एवमप्यात्मविश्लेषार्थंवर्णयामस्माह॥ सत्यानंदइति॥ सत्यानंदस्वरूपंत्वमसियत्रस
त्यानंदस्वरूपेत्वयिभेदः॥ शरीरभेदोनविद्यतेनास्ति॥ नन्वेवंसर्वस्यापिजगतोमच्छरीरत्वेनश्रूयमाणत्वा
त्तत्राप्यभेदःस्यादित्यतआह॥ नवेतिश्चयंनत्वमहमितिप्रपंचस्त्रिधावर्त्तमानस्तवलीलाचरित्रं॥ नतूक्त
विशेषणाविशिष्टेसत्यानंदस्वरूपेत्वयिवस्तुतोस्तियेनाभेदःस्यादितिभावः॥७०॥ सत्यानंदस्वरूपेशरीर

सन्मात्रस्याद्वितीयस्यविभोरेकस्यतेप्रभो॥ शक्तितत्वादिभेदोयंवस्तुतोनैवविद्यते॥७१॥ स्वस्वा
तंत्र्यात्स्वरसोर्वाशक्त्यादिरूपवर्ण्यते॥ भजतांमुक्तरूपस्याद्वानामरूपेमहेश्वर॥७२॥

शरीरगोरभेद
मुक्तादीनामप्यभेदमाद्वयन्मात्रस्येति॥ सन्मात्रस्यसर्वोत्तमस्येत्यर्थः॥ सर्वोत्तमत्वात्सन्नामाहहरिर्नारायणः
प्रभुरितिवचनात्॥ मात्रपदेननामनामिनोरप्यभेदोदर्शितः॥ अद्वितीयस्यसमाधिकरहितस्येत्यर्थः॥ समाधि
कनिर्मुक्त्यर्थमाद्वितीयः॥ पंदंतयेतिवचनात्॥ विभोःसर्वत्रावस्थितस्येतवशक्तितत्वादिभेदः॥ रामस्येयंशक्ति
रामस्येदंतत्वमित्यादिभेदोवस्तुतोनैवविद्यतेत्वयिःशक्त्यादिकंपदंस्तितत्सच्चिदानंदात्मकमितिभावः॥ उक्तंचै
तन्नारदपंचरात्रेरामस्यगुणरूपंचलीलाधामपरात्परं॥ एतच्चतुष्टयंनित्यंसच्चिदानंदविग्रहादितिनन्वेवंश

क्तादीनामभेदेजडाया॥ शक्तेरप्यभेदःस्यादित्याशंक्याह॥ ७१॥ स्वस्वात्मेत्यादिति॥ स्वस्यात्मनः॥ स्वातंत्र्यास्तिस्वस्यो
स्वछिकर्तृमिच्छोस्तत्वशक्तिर्मायाआदिपदेनकालादीनांग्रहणं॥ शक्तिरादिर्यस्यतत्तथात्वमप्युपचर्यतेऔपचारि
कमित्यर्थ॥ नतुस्वरूपभूतइतिभाव॥ नन्वेवंजडशक्तिपरिग्रहः॥ किमर्थमितिचेत्तत्राहस्यान्नित्वात्मार्थम्॥ भ
भजतामितिनामकर्तयतांरूपंचभजतांमुक्तयेशक्त्यादिपरिग्रहस्यान्नित्वात्मार्थम्॥ अन्यथापूजनसामग्रीविना
जीवानांमीश्वरसेवनानुपपत्तिदितिभावः॥ वाशद्धोपादपूरणार्थको॥ ७२॥ निराकारइतिनिराकारः॥ प्रकृता

निराकारोपिसाकारोभक्तानामनुकंपया॥ स्वानंदएवरमसेस्वछंदगतिरीश्वर॥ ७३॥ भिन्नामिवविधाये
नांविछन्तिजनकात्मजां॥ गोपायस्यात्मनात्मानंतारकंब्रह्मशाश्वितं॥ ७४॥

काररहितोपित्वंभक्तानांदेवसेव
कानामनुकंपयाब्रह्मादिरूपेणसाकारोभवसितत्रापिप्राकृताकारेषुब्रह्मादिष्वयंतर्यामितयावर्त्तमानस्त्वंस्वानं
देसच्चिदानंदात्मकस्वरूपेएवरमसेनतुतत्तद्धर्मैर्युज्यसइतिभावः यतःस्वछंदगतिरीश्वरश्च॥ ७३॥ श्रीजानकीत्व
दुपेवेत्याहभिन्नामितिएनांजनकात्मजांविछिन्तिंवेतमशक्तिंभिन्नांमिवविधायनतुस्वरूपतोभिन्नांमित्यर्थः
तारकंसंसारतरणहेतुंब्रह्माशाश्वितंब्रह्मशब्दवाचम्॥ आत्मानंजानकीरूपंआत्मानंगोपायसिपालयसीत्य
र्थः॥ ७४॥ इदानींश्रीरामस्यसाकल्येनवर्णनाभावंसूचयन्नाह॥ यतइतियतोमनसासहवाचोदूरतोनिवर्त्तेयंसा

कल्पेन वर्णयितुमशक्यादूरतो निवर्तनाभवतीत्यर्थः ॥ तत्परं ज्योतिः शब्दाभिधेयस्त्वं नन्वादित्यज्योतिवत्तदपि जडत्वा
न्नेत्याह ॥ तमसः परमिति भौतिकं ज्योतिः स्तमः शब्दवाच्यायाः ॥ प्रकृतेः कार्यत्वात्तमएवइदं तु ततो विलक्षणमि
त्यर्थः ॥ तथापि परंज्योतिः ॥ शब्दवाच्यं श्रीराम तत्त्वमुत्पत्तिविनाशशीलं किमस्यादित्याशंक्याह ॥ अव्ययमिति ॥ ७४ ॥
यस्मादेवंप्रभावो भवांस्तस्माद्भगवतो वयमतः कंप्याएवेत्याह ॥ तवेति ॥ अहं शिव ॥ हरिर्विष्णुः ब्रह्मा च तवांशाः सर्वेषा
मंतवांशाः ॥ किं बहुनोक्तेन चराचरं प्राणिमात्रं तवांश इत्यर्थः ॥ हि यस्मात्तवोत्कृष्टांशोहं तस्मादुमया पार्वत्या स

यतो वाचो निवर्त्तंते मनसा सह दूरतः ॥ तत्त्वमेव परं ज्योतिस्तमसः परमव्ययं ॥ ७५ ॥ तवांशोहं हरिर्ब्र
ह्मा सर्वे देवाश्चराचरं ॥ जगत्पूज्यो ह्यहं तस्मादुमया सह चानघ ॥ ७६ ॥ आवां राम जगत्पूज्यावावयो
श्च युवां सदा ॥ त्वन्नामजापिनी गौरी त्वन्मंत्रजपवानहं ॥ ७७ ॥ मुमूर्षोर्मणिकर्णिकायां गंगोदके निवासि
नः ॥ अहं दिशामि ते मंत्रं तारकं ब्रह्मसंज्ञकं ॥ ७८ ॥

हे जगत्पूज्योस्मि चकाराद्धरिब्रह्मारिब्रह्मणोप्येवं जगत्पू
ज्यत्वमितिशेषः ॥ ७६ ॥ पूर्वश्लोकोक्तार्थानुवादपूर्वकं पूर्वार्द्धस्य फलमाह ॥ आवामिति हे राम युवां सीतारामौ आ
वयोः ॥ पार्वतीश्वरयोः ॥ पार्वतीश्वरयोः ॥ पूज्यौ आवां पार्वतीश्वरौ जगत्पूज्यौ यतस्त्वन्नामजापिनी गौरी ॥ अहं
च त्वन्मंत्रजपवान् ॥ त्वन्नामजापिनीति पाठे तच्छब्देन सीतोच्यते ॥ ७७ ॥ यतोहं त्वद्भक्तो ततो मुमूर्षोः ॥ पुरुषस्य

॥रा॰गी॥

॥१३॥

मणिकर्णायां तनुं त्यजेत्तत्राप्यहं दिक्‌निवासिनो जन्तस्याहं तेन तव मंत्रं यच्छन्‌ ब्रह्म दिशामि ददामीत्यर्थः॥ कीदृशं ब्रह्मवा
चकं ब्रह्मणस्तव वाचकम्॥ ७८॥ किं तत्तारकमित्यपेक्षायामाह॥ श्रीराम इति श्रीराम इत्येतन्नाम तारकं मंत्रमुच्यते
मुनिभिः कथ्यत इत्यर्थः॥ तस्मात्त्रिनितल आत्मनेतन्मंत्रं जपे आदरातिशयं द्योतयति॥ हे जानकीनाथ एतत्तव नामैव
संसारभयनिवर्त्तकमतस्त्वं निश्चितं परं ब्रह्मासि तव त्रोनामः॥ कश्चित्परं ब्रह्मशब्दवाच्य इत्यर्थः॥ ७९॥ नन्वेवं तर्हि ता
रकमंत्रत्वेन सत्प्रसिद्धं मां कथं न जानंतीति तत्राह॥ त्वन्मायेति त्वदीयामायातया मोहिताः मोहं प्राप्ताः सर्वे जीवा

श्रीराम राम रामेति ये तं तारकमुच्यते॥ अतस्त्वं जानकीनाथ परं ब्रह्मासि निश्चितं॥ ७९॥ त्वन्मायामोहि
ताः सर्वे न त्वां जानाति तत्त्वतः॥ त्वद्भक्ता वै विजानंति ब्रह्मैकं त्वामखंडितं॥ ८०॥ विश्वरूपस्य ते राम विश्वे
शब्दाहि वाचकाः॥ ८१॥

तत्त्वं त्वां न जानंतीत्ययं ध्येवं तर्हि मज्ञात्वं विना जीवानां संसारनिवृत्तिर्न कथंचिदपि स्या
दिति चेत्तत्राह॥ त्वद्भक्तैरेवेति त्वद्भक्ताः श्रवणकीर्तनादिरूपया भक्त्यैव त्वां विजानंति न तु मायां तरेण कीदृशं त्वा
मखंडितमबाध्यं ब्रह्मब्रह्मणकं॥ ८०॥ विश्वरूपस्येति॥ हे राम विश्वे सर्वे शब्दाः॥ विश्वरूपस्य ते तव वाचकाः
कथं रामनाम्नो विशेषत्वमिति चेत्तत्राह॥ तथापीति जगत्कारणभूतस्य जगत्कारणभूतस्तव समानशी
लो॥ रामेति मूलमंत्रो विश्वेषां शब्दानां बीजं कारणं॥ पुलहसंहितायां मप्येवमुक्तं बीजे यथा स्थितो ब्रह्मा: ॥१३॥

शाखापल्लवसंयुत॥ तथैवसर्ववेदाहिरकारेषुव्यवस्थिताइति॥ अंकुरोत्पन्नाविवतस्यकार्योत्पत्तौनाशमा
शंक्याह॥ अक्षयमिति॥ २१॥ प्रकारांतरेणास्यजपंतत्फलंचाहतारादिति॥ तारः प्रणवस्तदादिरयंमंत्रोमुक्त
येमोक्षफलायभवतिमालक्ष्मीस्तद्वीजादिः॥ भुक्तयेभोगायवाग्भवंवाग्बीजंतदादिश्चवाक्सिध्येभवति
मायावीजादिस्तुअखिलेष्टदोभवति॥ २२॥ सर्वफलार्थिनांतत्रवीजत्रयक्षेपोनापेक्षितइत्याह॥ अचिंत्य

तथापिमूलमंत्रस्तेसर्वेषांवीजमक्षयं॥ २१॥ तारादिर्मुक्तयेरमरमादिरपिभुक्तये॥ वाग्भवादि
श्चवाक्सिध्येमायादिरखिलेष्टदः॥ २२॥ अचिंत्योयंमहावाहोमंत्रचिंतामणिर्विभो॥ विहायै
नंविमूढात्मानतस्यैतत्स्वधावति॥ २३॥ तत्वत्रयमिदंगुह्यमेकीकृत्यस्वमूर्द्धनि॥ स्वयंज्योतिः
प्रपश्यंतियद्गत्वाननिवर्तते॥ २४॥

इतिमंत्रेषुचिंतामणिः॥ संकल्पमात्रेणसर्वकामधुगित्यर्थः॥ हेम
हावाहोभुक्तिप्रदहेविभोमुक्तिमुक्तिप्रद एनंमंत्रराजंविहायविमूढआत्मायस्यसोयंलोकः॥ इतस्ततोधाव
ति॥ स्वदन्यदेवतामंत्रान्स्फाइफलान्जपंतीतिभाव॥ २३॥ तत्वत्रयमिति॥ इदंवक्ष्यमाणंरेफादिलक्षणं
अग्न्यादिलक्षणांरुद्रादिलक्षणांचतत्वत्रयंगुह्यंसंप्रदायहीनैर्ज्ञातुमशक्यं॥ एकीकृत्यपरस्परंभिन्नंनश्च
तीतिभावनांकृत्वेत्यर्थः॥ स्वमूर्द्धनिस्वयंज्योतिःस्वरूपंप्रपश्यंति॥ यज्ज्योतिर्गत्वाप्राप्यननिवर्ततेससारे॥

नापततिइत्यनेनकैवल्यमुक्तिरप्यनेनैवमंत्रप्रभावेणभवतिदर्शितंभवति ॥२५॥ योगिनस्तत्त्वानुयायमाह
त्रीणीतित्रीणि ॥ ज्योतींषि अग्न्यादिमंडलानि निर्भिद्य मनसा सह प्राणवायुनातिक्रम्य योगिनः ॥ स्वराजं स्वेनै
व शोभमानं ॥ अचलं सर्वत्र सदैवावस्थितं अत एव विभुं प्रपद्यंते सुषुम्नामार्गेण प्राप्नुवंतीत्यर्थः ॥२६॥ त्रीणिज्यो
तींषीत्युक्तं तानि कानि तत्त्वत्रयमिदमित्युक्तं तत्किं तस्य चैकीकरणं वा कथमित्याकांक्षायामाह ॥ रुद्राग्निरि
ति रेफो रकारः रुद्राग्निरुच्यते ॥२७॥ मकारो विष्णुः सोमो ज्योतिर्द्वितीयं इष्यते ॥ तयो रेफमकारयोर्मध्यगतः ॥

त्रीणि ज्योतींषि निर्भिद्य मनसा मारुतेन च ॥ योगिनस्त्वां प्रपद्यंते स्वराजमखिलं विभुं ॥२६॥ रुद्राग्नि
रुच्यते रेफो विष्णुः सोमो मउच्यते ॥ तयोर्मध्यगतो ब्रह्मा त्वाकारो रविरुच्यते ॥२७॥ ज्योतींषि कव
लीकृत्य त्रीण्याकाशो विभुः स्वयम् ॥ नादोभिधत्ते सन्मात्रं त्वामेव परमेश्वरं ॥२८॥ मुख्यत्वाद्विश्व
जीवत्वात्तारकत्वान्महेश्वर ॥ त्वदंशैः स्वीकृतं देवै रस्माभिर्नामते त्रिभिः ॥२९॥

आकारो ब्रह्मा रविर्ज्योतिः तृ
तीयमुच्यते त्रीणि ज्योतींषि रकारमकाराकाररूपाणि कवली ॥ कृत्यैकीकृत्य स्वयं भगवान् ॥ राम इत्युच्यते कीदृ
शः ॥ आकाशः आसमंतात्काशते प्रकाशत इति इत्याकाशः ॥ अत एव विभुस्त्रिष्वपि देवेषु व्यापकः नादः रामेतिना
मैव नादः ॥ सन्मात्रं सत्यस्वरूपमेव परमेश्वरं त्वामभिधत्ते प्रतिपादयतीत्यर्थः ॥ तव नाम्नो मुख्यत्वात् ॥ विश्वजीवत्वा

त् ॥ विश्वकारणत्वात् ॥ तारकत्वात्पालकत्वात् ॥ त्वदंशैर्ब्रह्मविष्णुरुद्रसंज्ञकैः ॥ देवैर्देदीप्यमानैस्तैस्तेन रामेति नामसृ
ष्टिस्थितिसंहारार्थं रकारादिभेदेन स्वीकृतं यतोऽनन्तत्वदात्मकस्य रामेति नाम्नः ॥ सर्वकारणत्वमुचितमित्यर्थः ॥ त्वे
न्ये स्माभिस्ते नाम स्वीकृतमित्युक्तं ॥ तत्प्रकारांतरेण प्रपंचयति भार्गवइति ॥ विधिर्ब्रह्मा ॥ भार्गवः ॥ परशुरामः ॥ वि
ष्णुरपि दाशरथिर्भूत्वा स्वीकरोति पुनरिमनेन ॥ कल्पांतरे विष्णुना ते नाम स्वीकृतं ॥ एतदेवोक्तं सदाशिवसंहिता
यां ॥ ज्ञात्वास्य पार्श्वदो जातो रामस्स प्रवरोऽप्रिये ॥ तदा नारायणः साक्षाद्रामरूपेण जायते ॥ प्रतापी राघवस्तस्वो भ्रा

भार्गवोयं पुरा भूत्वा स्वीचक्रे नाम ते विधिः ॥ विष्णुर्दाशरथिर्भूत्वा स्वीकरोत्यधुना पुनः ॥ ६० ॥ संकर्षण
श्चतत्त्वाहं स्वीकरिष्यामि शाश्वतं ॥ एकमेव त्रिधोपात्तं सृष्टिस्थित्यंतहेतवे ॥ ६१ ॥ भ्रातरस्ते त्रयो
राम ब्रह्मा विष्णुरहं तथा ॥ त्वत्तो विनिर्गतो भूयो वयं लीयेमहि त्वयि ॥ ६२ ॥

त्रावेसहरावणः ॥ राघवेणत
दासा सास्ता केनाद्वत्तीर्यत इति ॥ संकर्षण इति ॥ तद्रामेति श्रनाम शाश्वतं सर्वकाले ध्वाविनाशि संकर्षणः स
न्स्वीकरिष्यामि ॥ एवमेकमेव त्वन्नामेति नामास्माभिः सृष्टिस्थित्यंतहेतवे ॥ उत्पत्तिपालनसंहारार्थमुपात्तं स्वी
कृतमित्यर्थः ॥ ६३ ॥ इदानीमपि श्रीसीतापतेस्तव भ्रातृरूपेण सेवा सावधाना एवास्थिता इत्याह भ्रातर इति सौ
मित्रिर्विष्णुः ॥ भरतो ब्रह्मा शत्रुघ्नो रुद्रः ॥ ब्रह्मादीनां भरतादिषु लीनत्वात् ॥ वयं त्रयो देवास्त्वत्तो भरतादिरूपात् वि

एतच्चित्रमाश्चर्यम् ॥ २६ ॥ श्रीरामकोपोपशमनाय तत्पितरं देवरूपिणं दर्शयन्नाह पितातेयः स्वतेजसा
दीप्यमानः ॥ सोयंदशरथस्तेपिताएनंत्वंपश्यकीदृशंमिदं स्त्वत्प्रसादात्कांक्ष्यंनुगतोयस्यसतं इहलंकायां
त्वद्दर्शनेच्छ्यागतंपश्यदृष्ट्वाचप्रसीदेत्यर्थः ॥ त्वांदिदृक्षुमित्यनेनसाकेतंनत्वलोकंत्वयारहितंज्ञात्वा ॥ त
मपहायेहागतः मित्यनेननिर्गुणायाभक्तेर्मोक्षलघुताकृद्गुणोदर्शितः ॥ २७ ॥ किंच ॥ ब्रह्मेशान् ब्रह्मादीन्

चित्रमेतन्महाबाहोलीलावसथएवते ॥ दर्शेंद्रियेयतोविश्वंव्याप्नोषिचधियासहः ॥ २६ ॥ पिता
दशरथःसोयंदीप्यमानःस्वतेजसा ॥ पश्यैनमिंद्रानुगतंत्वांदिदृक्षुमिहागतं ॥ २७ ॥ त्वद्दर्शनमरा
नेतान्पितॄंश्चमुनिपुंगवान् ॥ अनुग्रहाणतेभक्तान्नराणन्यानिहागतान् ॥ २८ ॥ अमूनितववत्सला
निपरुत्रिंशाञ्चजगत्पते ॥ सुग्रीवप्रमुखाएतेत्वांभजंतिमहेश्वरं ॥ २९ ॥

पितॄन्कव्यवाहादीन्मुनिपुंगवा
न् ॥ नारदादीन्इहागतानिहमामानगंध्वानुगृहाण ॥ एतेषुकृपांकुर्वित्यर्थः ॥ २९ ॥ भक्तप्रियंश्रीराममवधा
र्यैतत्प्रसंसायसुग्रीवादीस्तद्भक्तान्प्रशंसति ॥ अमूनीति ॥ अमूनितनितववत्सलानिभूषणानिकिरीटंकुंड
लद्वयंनासामौक्तिकंकंठाभरणंकौस्तुभः ॥ आपीडप्रलंबवैकक्षिकवैजयंतीवनमालारत्नमालामौक्ति
कमालाविद्रुममालातुलसीमालेऽतिवनमाला ॥ मणिबंधभूषणद्वयंकटकद्वयंदशांगुलंमुद्रिकाःको

॥रा०गी०॥ निर्गताउत्पन्ना॥ त्वयिभरतादिरूपेलीयेमहि॥ ननुपरब्रह्मणोब्रह्मादीनामुत्पत्ति॥ अपतेनत्वमत
॥१५॥ इत्याशंक्यात्वमेवंपरंब्रह्मेत्याहमेवपरंब्रह्मेत्याहत्वमिति॥ परमंसर्वोत्कृष्टंगुह्यंगोप्यंयद्वस्तुतत्त्वमेवप
रमंपदंमत्कैः॥ प्राप्यंत्वमेवपरमंब्रह्मत्वमेवशरणंरक्षकः॥२३॥ वेदांतवाक्यानांत्वय्येवतात्पर्यमित्याह
तत्वमसीतिहेरामवेदांतेषूपनिषत्सुयानिमहावाक्यानितैरुपपादितंयत्परंब्रह्मतत्वमसिइतिहेतोर्मंत्रः
प्रणवस्तत्वार्थंयथार्थत्वांनिर्वक्तिप्रतिपादयतिद्रु॥ उंकारवाच्यस्त्वंरामइत्युक्तत्वात्इतिहेतोनमोस्तु॥२४॥

त्वमेवपरमंगुह्यंत्वमेवपरमंपदं॥ त्वमेवपरमंब्रह्मत्वमेवशरणंहिनः॥२३॥ तत्वमसीतिवेदांतम
हावाक्योपपादितम्॥ निर्वक्तिमंत्रस्तत्वार्थमितिरामनमोस्तुते॥२४॥ सीतानवद्याविद्येयंत्व
न्मयीत्वत्परायणा॥ पश्यैनामात्मनःशक्तिमप्राप्यामात्महिंसकैः॥२५॥

यथात्वंतथैवेयंसीतापीत्याह
सीतेति॥ अनवद्यादोषरहिताविद्याज्ञानरूपात्वन्मयीत्वद्रूपास्ति॥ यतस्त्वन्मंयअतस्त्वत्परायणा॥ त्वमेवपरं
सर्वोत्कृष्टम्यनमाश्रयोयस्याःसा॥ एनांतामात्मनः॥ शक्तिंत्वंपश्यंकीदृशीमात्महिंसकैरात्मघातभिः॥ संसारास
क्तैरप्राप्यंप्राप्तुमशक्याम्॥२५॥ श्रीरामस्यस्वरूपवर्णपविश्वरूपशंकितोवर्णयन्नाहाचित्रमिति॥ हेमहा
वाहोतेतवलीलावसथंलीलागृहंविश्वंधियाबुध्यासहदृशोद्विधैस्त्वंआमनोषिततोवहिरपिवर्ततेएत ॥१५॥

वीनूपुरद्वयं ॥ पादकटकद्वयमित्येवंषट्त्रिंशत्संख्यकानि ॥ अनंततत्वाभरणमितिवक्ष्यमाणग्रंथेनास्याभ
रणान्येवतत्वानीतिप्रदर्शनादत्रतत्वान्याभरणान्येवबोध्यानि ॥ तान्याभरणान्येवसुग्रीवप्रमुखाभूत्वात्वां
भजंतिसेवंते ॥ एतेनसुग्रीवादीनांतदाभरणत्वेनसच्चिदानंदात्मकत्वंसूचितंभवंति ॥ २६ ॥ यइतिएतेप्रसिद्धाः
तेचदेवादेवावतारिणः त्रयस्त्रिंशत्कोटिसंख्यकाः मुख्यास्तेचत्वामुपासते ॥ एतेषामवतारित्वेप्रमाणं ॥ मत्कृ
तसर्वसिद्धांतेद्रष्टव्यं ॥ २७ ॥ केनप्रकारेणतेष्वनुग्रहः कार्यइतितत्राह ॥ उपसंहरेतिविश्वात्मन् विश्वभावनेति

यएतेवानराःसर्वेऋक्षाजांबवदादयः ॥ तेत्वामुपासतेदेवास्त्रयस्त्रिंशच्चकोटयः ॥ २७ ॥ उपसंहर
कोपंहेविश्वात्मन् विश्वभावनः ॥ त्वंगतिःसर्वलोकानांभर्त्तापोत्तमहेश्वरः ॥ १ ॥ कोपोऽकाले
चसंहारेक्रियतेभवताधुनासीतयोन्मूलितंरक्षोविघ्येवोत्कटंतमः ॥ २ ॥ त्वत्कोपेतिननुदग्धस्य
कथमुज्जीवनंस्यादितिचेत्तत्राह)
संबोधनद्वयेन ॥ तवकोपोनुचितइतिदर्शयतियतस्त्वंसर्वलोकानां
गतिर्भर्त्तामहेश्वरश्च ॥ १ ॥ ननुकोपःसंहारार्थमुचितएवेत्याशंक्याह ॥ कोपइति ॥ अकालेऽसमये ॥ अकालेपिको
पः शत्रुवधार्थंभवत्येवेतिचेत्तत्राह ॥ सीतयेति ॥ सीतयोन्मूलितिरक्षइत्यत्रदृष्टांतमाह ॥ विघ्येतिउत्कंठप्र
बलंतमोज्ञानंयथाविद्ययावेदांतोदितोपासनयानष्टमित्यर्थः ॥ २ ॥ एवंस्तुत्वाप्रार्थयते ॥ त्वत्कोपेति ॥ ननुद

ग्धस्य कथमुज्जीवनं स्यादिति चेत्तत्राह ॥ त्वद्दयेति त्वद्दयैवामृतं तस्य सेकस्तेन ॥ ३ ॥ मयि किंकरे अवस्थिते प्रलय
करणेऽति नीचकर्मणि प्रयासो मम अधिकारहरणं चानुचितमेवेत्याह ॥ त्वयेति ॥ कालो मूर्तिर्यस्य सोऽहं संहारे कर्म
णि नियुक्तः नियोगं प्राप्तः ॥ ४ ॥ ततः किं हृतमित्यपेक्षायामुक्तं ॥ आह इतीति वक्ष्यमाणं वाक्यमुवाच ॥ ५ ॥ तदेवाह ॥

त्वत्कोपानलविप्लुष्टं जगदेतच्चराचरम् ॥ त्वद्दयामृतसेकेन पुनरुज्जीवयेश्वर ॥ ३ ॥ त्वया नियुक्तः
संहारे कालमूर्तिरहं प्रभो ॥ समयेतं करिष्यामि प्रसीद दयया निधे ॥ ४ ॥ श्रीसूत उवाच ॥ इत्युक्तः
शंभुना रामः प्रसादाभिमुखस्तदा ॥ उपसंहृत्य कोपाग्निं तमुवाचाथ शंकरं ॥ ५ ॥ श्रीराम उवाच ॥ गौ
रीश यत्त्वया प्रोक्तं तत्तथास्तु ममाज्ञया ॥ शिवभक्त समस्तेभ्यो लोकेभ्यो वृषभध्वजः ॥ ६ ॥ स्तुतोऽहं य
त्त्वया शंभो स्तोत्रैर्वेदान्तगोपितैः संतुष्टः परया भक्त्या वरं दास्याम्यनुत्तमं ॥ ७ ॥ श्रीमहादेव उवा
च ॥ यदि प्रसन्नो भगवान् भक्तिमव्यभिचारिणीं ॥ त्वय्येवाविरतां देहि नान्यन्मे हृदयाम्यहं ॥ ८ ॥

गौरीशेति ॥ ६ ॥ न केवलं लोकानामभयं दत्तं किंतु तुभ्यमनुत्तमं वरमपि दास्यामीत्याशयेनाह स्तुत इति पर
या भक्त्या वेदान्तेषूपनिषत्स्वपि गोपितैः ॥ स्तुत इत्यन्वयः ॥ ७ ॥ यदीति असंदेहे संदेहवचनमिदं ॥ अव्यभिचा
रिणीं नैष्ठिकीं अविरतां निरंतरां यावतीम् ॥ नान्यदिति ॥ अमप्रसादफलस्य भक्तिफल एवांतर्भावादिति भाव ॥

एवमितियत्त्वयोक्तं तत्तथास्तु ॥ ९ ॥ तदेवाहयइति ॥ १० ॥ अथप्रतिबंधकशत्रुविनाशोपायमाहरहस्यमि
तियोसौमंदंशोऽकुरः कालाग्निः प्रलयाग्निरूपः ॥ सत्वमेवाजौसंग्रामेस्मृतः सन् अमोघास्त्रमप्रतिहतास्त्रं
त्रं ॥ यत्प्रसादादिति ॥ यस्यास्त्रस्यप्रसादादनुष्ठानरूपात् ॥ १२ ॥ अस्त्रप्रभावमुक्त्वातदुपदिशति ॥ अस्त्रमि

एवमस्त्विति तेचोक्त्वाप्रसन्नः करुणान्वितः ॥ पूजयित्वायथान्यायं वचनंचेदमब्रवीत् ॥ १९ ॥
यस्तोतिपरयाभक्त्यास्तोत्रेणानेनमानवः ॥ सयातिपरमंस्थानंयद्गत्वानशोचति ॥ २० ॥ रह
स्यमन्मइस्यामिभक्तानामनुकंपया ॥ येनस्मृतेनसंग्रामेशत्रूणांसंक्षयोभवेत् ॥ २१ ॥ योसौका
लाग्निरुद्रोभून्मत्तः शत्रुविनाशनः ॥ मदंशः सत्वमेवाजावमोघास्त्रंभविष्यति ॥ २२ ॥ यत्प्रसाद
इयनैवशत्रुभ्यः पार्वतीपते ॥ जनंहंतुंतथाध्यातेमत्योरपिविनाशकृत् ॥ २३ ॥ अस्त्रंतु कवचा
दूर्ध्वं तारंचप्रणवात्पुरा ॥ महामंत्रेणायुग्मान्तु जीवाक्षरयुगंवदेत् ॥ २४ ॥

तेकवचात् ॥ एतेषांव्याख्या
नंविश्वरूपंकृतार्थसंदीपिकातोज्ञेयं तद्यथा हुंइत्येवास्त्रस्याग्रे फट् तस्मात्पूर्वः प्रणवः ॥ प्रणवात्पूर्वमाका
शंतमाग्निबीजं फ्ट्रिं तस्याग्रे राम रामेति तस्याग्रे ममेति तदग्नेतं घोरं ममुकमिति शत्रोर्नाम तस्याग्ने ह्राह्र
हनहनेति तदग्रेयोऽस्मानिति ॥ १९ ॥ कालवज्र इतिनाम्नाख्यातं ॥ येनास्त्रेणाइमं संवादंश्रुकः ॥ सनकंप्र ॥ १८ ॥

स्याह ॥ अथर्वणमिति ॥ अथर्वणवेदोक्तमित्यर्थः अस्य तेक्षिप्यते ॥ शत्रुप्रतीमस्त्रं ॥ सर्वसिद्धः ॥ १८ ॥ लक्ष

घोरोपलक्षितं शत्रुं तच्छब्देन विनिर्दिशेत् ॥ द्राक्पदादुपरिष्टात्तु हनद्वंद्वं समुच्चरेत् ॥ १५ ॥ यो
योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्येतदुच्चरेत् ॥ एतन्मदस्त्रं शत्रूणां मूर्ध्नि वज्रं पतिष्यति ॥ १६ ॥
कालवज्रमिति ख्यातं तव स्नेहात्प्रकाशितं ॥ येन शत्रुभयान्मुक्तो मद्भक्तः सुखमेधते ॥ १७
श्रीभृंग उवाच ॥ अथर्वणमिदं चास्त्रं नरनारायणाह्वयी ॥ भयछेत्तां वशिष्याय सर
र्वतर व मिरणो ॥ १८ ॥ लक्षत्रयमिदं जप्त्वा जुहुयात्तद्दशांशतः ॥ खादिरेणाज्यसंयुक्तेस्त
तः सिद्धिमवाप्नुयात् ॥ १९ ॥

त्रयमिति तद्दशांशतः ॥ लक्षत्रयदशांशम् १९ ॥ रुद्रगीतापाठफलमाह ॥ इतीति स्तोत्रमंत्रैर्वेद
मंत्रविशेषैस्तोत्रश्लोकैरित्यर्थः ॥ मर्त्यः ॥ मरणधर्मा मनुष्यः ॥ प्रतिदिनं राममाराधयति भि ॥ संन्यासिभि
रपि दुरापं धाम ॥ श्रीरामलोकं प्राप्य कीदृशम् द्वितीयं ॥ समाधिकरहितं ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

इतिश्रीमन्महाराजकुमारश्रीविश्वनाथसिंहदेवविरचितायां श्रीरामगीताटीकायांप्रथमो
ध्यायः॥१॥ शिवस्तुत्याप्रसन्नेश्रीरामेकिंवृत्तमित्यपेक्षायां॥श्रीशुकउवाच॥उपात्तोगितरोद्वं

श्रीशुकउवाच॥ इतिशिवमुखपद्माद्दुत्थितैस्तोत्रमंत्रैः॥प्रतिदिनमिहभक्त्या
राममाराध्यमर्त्यः॥ यतिभिरपिदुरापंप्राप्यधामाद्वितीयं॥ निरवधिभवदुःखा
न्मुच्यतेशीघ्रमेव॥इतिश्रीस्कंधपुराणेनिर्वाणखंडेद्वात्रिंशत्तमोध्यायः१
श्रीशुकउवाच॥ उपात्तोगितरोद्वांशंवैश्रवांसेव्यवस्थितं॥ तदेवांशमुपादि
त्सुंब्रह्मंचनिजयेच्छया॥१॥ राम॥ राम॥ राम॥ राम॥ राम॥ राम॥

शमितिश्चादावुपात्तः॥स्वीकृतः॥पश्चादुझितः॥त्यक्तोर्थाच्छिवायदत्तः॥ऐद्वांशोयेनशतंरामंदृष्ट्वा
हरिः॥विष्णु॥भूयोभूयः॥प्रणतोभूत्वा॥कृतांजलिस्तुष्टावइतिषष्ठेनान्वयः॥तदेववैश्रवांशपरि
ग्रहकालेब्रह्मंचांशंउपादित्सुंग्रहीतुमिच्छुः॥पुनः॥कीदृशं॥१॥ ॥ ॥ ॥ ॥ ॥

अनंततत्वाभरणंअनंतोनाशोयेषांतानितानितत्वानिचतान्येवाभरणानियस्यतं ॥ अनंतादित्यवर्चसं ॥ अ
नंतानामसंख्यानामादित्यानांवर्चइववर्चोयस्यसतं ॥ अनंतकरपान्नेत्रं करपादनेत्राणिचशिरांसिचवक्त्राणि
चतेषांक्रियाअनंताश्चताभिरन्वितं ॥ ३ ॥ प्रभामंडलेनमंडितं अतएवनिराकारंआकाररहितंमिथोपलक्षि

अनंततत्वाभरणमनंतादित्यवर्चसं ॥ अनंतकरपान्नेत्रशिरोवक्त्रक्रियान्वितं ॥ ३ ॥ निराका
रंचसाकारंप्रभामंडलमंडितं ॥ विश्वैकसाक्षिणोविश्वंविश्वातीतंनिरंजनं ॥ ३ ॥ क्वचित्प्रसं
न्नमेवात्रशांतमन्यत्रभैरवं ॥ नानाशक्तिसमाकीर्णमध्यानेकविग्रहं ॥ ४ ॥ श्रीराम

तंवस्तुतस्तुसाकारं ॥ विश्वस्मिन्नेकोलौकिकोविकारलेशोन ॥ साक्षीविश्वैकसाक्षीतंविश्वंविश्वरू
पिणंविश्वरूपत्वेविकारित्वंस्यात्अतआहविश्वातीतमिति ॥ ३ ॥ क्वचिदितिक्वचिद्देशेशिवरूपेशिवभक्तस्याप्र
सन्नंप्रसादयुक्तंअन्यत्रविद्वेषीभैरवंप्रसादरहितं ॥ परस्परविरुद्धानेकरूपत्वेकारणमाह ॥ नानाशक्ति
समाकीर्णमितिविचित्रानेकशक्तिसहितमित्यर्थः ॥ अतएवाध्यामनेकेविग्रहायस्यसतं ॥ ४ ॥

रा.वी. हृदयाभिनिवेशिनमीश्वरं ॥ कानुगमं स्तुत्यमपथाकं नैमित्तमयमिस्य यो मानवलोकस्यास्ते न गोत्स्यपो ॥ आदित्यलोकादिवित

१९ नैवृत्तिवोध्रिर जितोगर्दितोगद्यमितगितत्थो ॥ नानाव नारनाद्रूपमाकनरपरस्तिनादरूपं ॥ भूपावाश्व

ज्ञानीनासुदेवः ॥ स्वरूपं प्रपंचस्य सर्वसंसारविनाशकारणोमारायणरूपं नारायणरूपं नाशायनारप्यान्विदत्विनगि

तिमावन ॥५॥ विष्णुकदेहस्तेपि विष्णुनिगायतविष्णुतिमोत्तरे हाय ॥ निमेषनिनायायाधितायनिनस्मापि

हृदयमीश्वरमाभेनः श्रीरंगं परमेश्वरं ॥ प्रतिलोमं विधिं मेघवर्णं शरदाइरजिमांस्विते ॥५॥ वहस्य

मरूपं च हरेरामहरिशादा ॥ तुष्टा च मता नोभूत्वा भूपोभ्ययः कृतांजलिः ॥६॥ श्री विष्णु रु

वाच ॥ नमोस्तु मायविनश्वरूपायविष्णवे कस्मादिरा ॥ नमो विष्णुकदेहाय नमो विष्णु निगा

यते ॥७॥ नमो नित्याय मध्यदायप्रभवेकालमूर्तये ॥ दशादिग्वाहवेन मो नमो भूधराय च ॥ रा

श्रीनारदेरिषाम्युदंवारयन्नाह ॥ प्रहायेतिप्रभवेव्याप्रकायननरव कालमूर्तये कालस्य प्रवर्तकाय प्रभुस्व

प्रपंचयन्नाह ॥ दशादिगित्यादिना भुजास्तेरनोयस्य सतस्मै वत्सरं चेद्भागमोदिनेआदिनायस्य एकोनपंचा

शद्वायव वस्त्रेशायस्यव्योमदेहोयस्य सतस्मै ॥८॥ किंच हेराम नेत्रं व विस्वरूपस्याहं विष्णुरूदयेम ॥ पिता

महोब्रह्मा नाभिः ॥ नीलकंठः ॥ शिवकंठः ॥ ईश्वरः ॥ ईश्वरनामा शिवः ॥ नवभूमध्यं भुवोमध्यं मध्यभागः ॥१०॥ ॥१६॥

सदाशिवस्तन्मात्रेललाटः॥ ततोललाटादूर्ध्वंतत्त्वानिमहदादीनिविश्वाकारस्यतेभूषणानिकुंडला
दीनि॥११॥ भूरादयःसप्तलोकास्तेंगभूमयोन्त्यस्थानानिसप्तपातालाः॥ अतलादयः॥ गर्त्तापादाधःतस्थाना
नि॥१२॥

नमोंबुरेतसेशश्वत्तेजोनेत्रायतेनमः॥ वायुचेष्टायमहत्तेव्योमदेहायतेनमः॥१०॥ अहंते
हृदयंरामतवनाभिःपितामहः॥ कंठस्तेनीलकंठोयंभ्रूमध्यंचतवेश्वरः॥ सदाशिवोललाटस्ते
ततऊर्ध्वंपरःशिवः॥ भूषणानितत्त्वानिविश्वाकारस्यतेप्रभो॥११॥ भूरादिसप्तलोकाश्चन्त
स्तवोरंगभूमयः॥ सप्तपातालगर्त्ताश्चपादाभ्याधातोस्थितास्तिते॥१२॥ अनंताशक्तयोरा
मप्रत्यक्षंतेत्तवप्रभो॥ वहन्त्यहप्पूर्वांश्चपश्यामिपितामहान्॥१३॥ विस्तृतसंख्यान्
पश्यामित्वयिरुद्राननेकशः॥ बहुरूपान्बहुभुजान्बहुवर्णान्महोदयान्॥१४॥ वर्त्तमाना
नतीतांश्चसर्वानिहभविष्यतः॥ नाहमंतंप्रपश्यामिविभूतीनांतवप्रभो॥१५॥ श्रीरामपन्म

किंबहुनोक्तेनहेरामतवानंताशक्तयः॥ अनंतशक्तित्वेप्रपंचयन्नाहबहूनिति॥१३॥१४॥१५॥ किंचदेवाद
यः॥ स्थावरांतास्त्वदेकरोमकूपेसुलीयंते॥१६॥ कथमेकरोमकूपेषुलयमस्तिचेत्तत्राहसेतिगुणमयीसत्त्वाद्या

त्मिकातवमायाशक्तिः ॥ १५ ॥ तवेति अमीक्षेत्रज्ञाजीवाविज्ञानोचैतन्यस्यांशवः ॥ किरणासमूहाइवतवर
श्मयः ॥ तथैवास्मदादयोपितर्हिजीवेभ्यः कथंविशेषोस्तीत्यत ॥ आहभिन्नाइतिवयंत्वन्मयास्त्वदंशाप्रचु
राः ॥ भिन्नाइवप्रदृश्यंतेपरमार्थतोवस्तुतोनभिन्नाजीवास्तुतवभिन्नांशाअस्मदादयोऽभिन्नांशा ॥ इति

देवदानवगंधर्वाप्सरोरक्षसकिन्नराः ॥ विद्याकराश्चऋषयः सिद्धाश्चसहचारणाः ॥ १६
नराश्चपितरश्चैवपशवश्चसरीसृपाः ॥ त्वदेकरोमकूपेषुलीयंतेस्थावरैःसह ॥ १७ ॥ सेयं
मायागुणमयीप्रपंचोयंयदात्मकः ॥ तवेच्छातःसमुत्पन्नापयाविश्वंविमोह्यते ॥ १८ ॥ तवां
शवोमीविज्ञानोःक्षेत्रज्ञास्त्वस्मदादयः ॥ भिन्नाइवप्रदृश्यंतेत्वन्मयाःपरमार्थतः ॥ १९ ॥
पन्नगाहंसनक्षत्राः सिद्धाश्चऋषयस्तथा ॥ येनव्याप्तंचसकलंतत्तेनाभिर्विमोनभः ॥ २० ॥

भाव ॥ १९ ॥ पन्नेतिहेविभोपन्नगाहादयःसंतितन्नभस्तेनाभिः ॥ २० ॥ नन्वेवंमद्रूपस्यमायिकत्वेकथमुपा-
स्यत्वमित्याशंक्यवेदांतमार्गेणाखंडसच्चिदानंदस्वरूपस्यप्रतिपादनादित्याह॰ ॥ त्वामिति आप्तवाचः ॥ आ
प्तस्येश्वरस्यवाचः ॥ त्वामखंडानंदरूपमहः ॥ आनंदरूपत्वेपिकथमखंडितत्वमित्यत आह निरस्तमायोप
धिमिति ॥ निरस्तान्मायातज्जन्यांतःकरणावतिलक्षणामुपाधिर्यस्मिन्स्सतं ॥ आनंदरूपस्यामायाका ॥ २० ॥

ण्येत्वाभावादखंडितत्वमिति भावः ॥ अंतर्यामिरूपेण सर्वत्र व्यापकत्वादेव यस्मिन्स्वपक्षादिकं ना
स्तीत्याह यस्मिन्निति ॥ अध्वषट्कं च मंत्राध्वा पदाध्वा वर्णाध्वा तत्वाध्वा कलाध्वा भुवनाध्वेत्यागमो
क्तम् ॥ अथवा प्राणाध्वा चक्राध्वा गुणतत्वाध्वा कोशाध्वा ज्ञानाध्वेत्येतद्रूपमिति ॥ मलत्रयं च मनोनि
ष्ठं वाक्स्थितं कायनिष्ठं च यत्र नास्तीत्यर्थः ॥ २१ ॥ षडूर्मय इति ॥ अशनापिपासे प्राणधर्मौ शोकमोहौ मनो

त्वामाहुरानंदमखंडमेकं निरस्तमायोपधिमात्मवाचः ॥ यस्मिन्स्वपक्षो न च वा विपक्षो
न चाध्वषट्कं न मलत्रयं च ॥ २१ ॥ षडूर्मयो यान च नामरूपे न कारणत्वं न च कार्यतापि
विमानतोन्त चादिर्न च मध्यमीषदालंबनं नैव च यस्य भावः ॥ २२ ॥ यतोऽतिदूरे निवसंति वा
चो मानान्यनेकानि हृदा सहैव ॥ येनैव विश्वं सहसा स्वभासा पूर्णं सूक्ष्मेण निरंतरेण ॥

धर्मौ जरामृत्यू स्थूलदेहधर्मौ एतद्रूर्मयो यत्र न संति तत्संबंधि नामरूपे च न स्तः ॥ अत एव न कारणत्वं म
दादिरूपत्वं ॥ कार्यता मिथ्यादिरूपत्वं च यस्मिन्नास्ति अंतादयोऽपि न संति तस्येषदालंबनमात्मप्रपञ्च
नास्ति नापि तद्वस्तु प्रत्यक्सच्चिदानंदरूपस्य प्रतिपादनात् ॥ २२ ॥ यत इति वाचो वेदलक्षणा यतोऽतिदूरे नि
वसंति यं साकल्येन प्रतिपादयितुमशक्यं तदान्येषां प्रमाणानां का गतिरित्याशयेनाह मानानीति ॥ प्रमा

नाम्नतु भानादीनि हृदा मनसा सहयेन त्वया स्वभासा स्वप्रकाशरूपेणेदं विश्वं पूर्णमिड्ढा सेदं पूर्णं च हि
म्वंतत्कथं नानुभूयते इत्याशंक्याह सुसूक्ष्मेणेति निरंतरेणैकरूपेणेत्यर्थः ॥२३॥ यस्येति नन्व वय विश्वा
दयः ॥ सर्वे स्मराः देवाः सर्वे पितरश्च कव्यवाहादयः स्तथान्येपि च्यंशभूता ॥ एवं बहुक्तेन किं रिरंसोरं तु मिछो
स्तव समस्तं जगद्विभूति ॥२४॥ एवं विभूतिमुपवरार्पश्रीरामस्य स्वरूपं वर्णयन्नमस्कारोरेति परात्मरायेतिः स

यस्यांशभूता श्च वयं तथान्ये स्मरा समस्ताः ॥ पितरश्च सर्वे किं वा बहूक्तेन जगत्समस्तं विभो
विभक्तिं परमा रिरंसो ॥२४॥ परात्परायाहत विश्वभूम्ने नमोस्तु स्वधाम्न हि नमो वितन्मः ॥ य
ज्ञानेशेषान् जुहुमश्च यस्मै स्वधां विदध्मः प्रपिता महायः ॥२५॥ त्रयीसमस्ता च वषट्कृ
तीसाः स्वाहा स्वधा विश्वभुजे च यस्मै ॥ उद्गीथ एवायमलं पदाम्भे वेदादि वीजं विजिता निला ॥

र्वेभ्यः परा उत्कृष्टा ब्रह्मादयस्तेभ्योपि परा पोत्कृष्टायेत्यर्थः विश्वः विश्वरूपः ॥ स चासो भूमा च विश्वभूमा च ब्रह
तोऽखंडित ॥ स चासौ विश्वभूमा च स तथा तस्मै स्वधाम्ने स्वप्रकाशाय तस्मै नु मं केवलेन मोवितन्मः कुर्मः न
तु स्तोतुं समर्थः इति भावः ॥ यस्मै यत्प्रात्निप्रयोजनाय च शेषान् यज्ञान् द्रव्ययज्ञास्तपो यज्ञाऽस्तु ज्ञान् प्रपिता
महाय यस्मै स्वधां विदध्मो वितरामः इत्यर्थः ॥२५॥ त्रयीसमस्तेति देवत्रयी वेदत्रयी लोकत्रयी न्ये वं समस्ता सर्वा ॥२१॥

त्रयीयस्मैयदर्थायभवतिवषट्कृतिरिंद्रभोगभागादेवभोगस्वाहाएतत्सर्वंजगच्चयस्मैकीदृशायविश्वंभुंजेजग
द्भोक्तोविशेषेणाजितोनिर्लेपस्तेषांयोगिनांपदांभोजयस्मायेःमुदीथः प्रणवएवालंसमर्थइत्यर्थः कथमुद्गी
थस्यतत्प्राप्तौसामर्थ्यमितितत्राहवेदादिवीजमितिसर्ववेदकारणं॥२६॥नन्वेवंचेत्कथंमोरावणादयोदुष्टे
शुरितिचेत्तत्राहनित्यायेति॥यस्मैअविद्यकपातान्नेनोपहतामूढाअविवेकिनोमर्त्यादिभावंमनुष्यादिभावं
परिकल्पदुष्यंतकीदृशायनित्यायबाधितायप्रभूणांहिरण्यगर्भादीनांनित्यप्रभवेअत्रहेतुगर्भविशेषणमा

नित्यायनित्यप्रभवेप्रभूणांसदावधूताखिलविक्रियाय॥ दुष्यंतविद्योपहताश्चयस्मैमर्त्या
दिभावंपरिकल्पमूढा॥२७॥देवाश्चसिद्धाऋषयश्चसर्वेवेदांततत्वार्थविदोपनीद्रा॥भक्त्यैवरा
मस्यहयंतियस्मैत्वमेवतद्ब्रह्मपदंद्वितीयं॥२८॥

हसदावधूताखिलविक्रियायेतिसदावधूतानिरस्तानि
रस्ताअखिलाविद्याजन्मादिविकारायेनसतस्मै॥२७॥नन्वेवंसर्वेषांजीवानांअविद्योपहतत्वान्मत्प्राप्तिः कथं
स्यादितिचेत्तत्राहदेवाइतिदेवादयः॥सर्ववेदांततत्वार्थविदंतीतितथायतींद्राश्चहेरामभक्त्यैवनान्योपायेनय
स्मैस्पृहयंतितत्त्वद्वितीयंब्रह्मत्वमेवासि॥२८॥ननुवासुदेवादिचतुर्व्यूहस्यप्रभुत्वस्यास्यत्वंशास्त्रेश्रूयतेइ
तिचेत्तत्राहयदितिहेरामअमूर्तैःप्राकृतमूर्तिरहितैःप्राकृतैर्दृश्यैः॥सतुदिव्यगुणोदधिरितिवचनात्॥त्व

॥रा॰गी॰॥ तास्तदा वयं सर्वे वासुदेवस्योर्विनिसृता उत्पन्ना इत्यर्थः॥ अत्र श्रुतिप्रसिद्धार्थो हि शब्दः॥ कदा विनिसृता

॥२२॥ इत्याकांक्षायामाह॥ यदेति एकमात्मानमनेकधा वासुदेवादिरूपेण स्वेच्छया विभज्य विश्वं व्यतनो विस्ता

रितवानसि एकस्मादनेका विनिसृतो दृष्टांतमाह भानोरिवेति॥२६॥ विश्वं वितनोति रिसुक्तं विश्वविस्तारप्र

पंचयन्नाह॥ एमत इति तवेयं क्रियाशक्तिः॥ पंचप्राणा एव नानानि यस्याः सा तथा इदं विश्वं करोति एषा तव

यदेकमात्मानमनेकधैव विभज्य विश्वं यतनोरमूर्त्ते॥ तदेव भानोरिवरस्मयो मीत्वत्तो वयं राम

विनिसृता हि॥२७॥ एमक्रियाशक्तिरियं हि पंचप्राणाननाविश्वमिदं करोति॥ चिच्छक्तिरेषा

नवपंचधैव तदेतदश्नाति स्वयं च षक्त्या॥२८॥ इच्छोभयात्रानुगता दशास जत्सवत्यत्ति च शक्ति

राधा॥ अनंतशक्तेरिह विश्वमूर्त्तेरस्ति त्वो दशाः शक्तिमतास्तवैव॥२९॥ चिच्छक्तिः॥ पंचज्ञानेंद्रियद्वारि

कानदेतद्विश्वमश्नाति पंचज्ञानेंद्रियाणि वक्त्राणि यस्याः सा॥३०॥ इच्छेति तवेच्छारूपा शक्तिराधा इदं जग

त्सृजति अवत्यत्ति च यत आधा अत एवोभयत्रानुगता उभयत्र क्रियाशक्तौ चिच्छक्तौ चानुगता प्राप्तात

एव दशा अनंताः शक्तयो यस्य तस्य विश्वमूर्त्तेस्तवेत्थं तिस्र एता शक्तयः॥३१॥ ननु शक्तीनामेव जगत्क

र्तृत्वे पतीषां इमानि भूतानि जायंते इति श्रुति विरोधः स्यादित्याशंक्याह॥ याभिरिति॥ हे महेश्वर याभिः ॥२२॥

स्वाभिः स्वीयाभिः ॥ कलाभिः शक्तिभिः सितासितलोहिताभि ॥ सत्वरजस्तमोरूपाभिस्त्वं विश्वं तया ॥
विश्वं तया विहर्तुं विभुमव्ययं अविनाशिनमात्मानमेव प्रपंचयसि विश्वरूपेण विश्वरूपिणमात्मानमेव प्रकटयसीत्य
र्थः विश्वरूपत्वेपि विक्रियाप्रसंगं क्षारयति ॥ अचल इति जगदंतर्वर्त्तमानत्वेपि सामर्थ्याभावनिषेधात्प्रभुरिति पालने
भोगेच्छां निराचष्टे आत्मन्नसंहरति ॥ ३२ ॥ किंच ताभ्य इति मन्वितिसंबोधनं ॥ हे महेश्वर ताभ्यः ॥ सत्वरजस्तमोरूपाभ्या

याभि महेश्वर सितासितलोहिताभिः स्वाभिः कलाभिरचलः प्रभुरात्मनस्तः सत्वं प्रपंचयसि
विश्वं तया विहर्तुं त्वामेकमेव विभुमव्ययमद्वितीयं ॥ ३२ ॥ ताभ्यस्तिस्रभ्य उदिता ननु ताव
की भोगौरींदिरागिराइ हे ईश्वर शक्तयोपि ॥ तत्षोडशांशविभवा निवसंति नित्यं रुद्रेषु विष्णुषु
विधौ नखेषु विश्वभर्तौ ॥ ३३ ॥ तिसृभ्यः शक्तिभ्यः इह ब्रह्मांडे ईश्वराणां ब्रह्मादीनां शक्तयोपि गौ
री पार्वती ॥ इंदिरा लक्ष्मी गीः सरस्वती एता उदिता उत्पन्ना इत्यर्थः ॥ तत्षोडशांशविभवा इति तासां
गौर्यादीनां ॥ ३३ ॥ षोडशांशाद्विभवउत्पत्तिर्यासां ता रुद्रादिषु लोकांतराधीशेषु नित्यं निवसंति ॥ ३३ ॥ किंच
पूज्य इति ॥ अहं विष्णुः अंतकरिपुः शिवः ॥ विरंचिर्ब्रह्मा त्वयि यो भाव ॥ प्रीतिस्तया भावितायुक्तः ॥ तात यै
वनित्यं जगतः पूज्यः ॥ न केवलमस्मदादयः ॥ पूज्या ॥ किं ते तेपि केचन विरला अवधूता ॥ असंस्कृतवेषाः ॥२३॥

त्वद्भक्त्याधौतनिर्मलं मनो येषां ते तथा निरस्तकामाः॥ संतो भुवने जयंति सर्वोत्कर्षेण वर्त्तन्ते॥ ३४॥ केचन जयं
तीत्युक्तं प्रपंचयंस्तत्र हेतुमाह अपीति पूर्वकल्पार्जितानां वेदोक्तशुभकर्मानुष्ठानमित्यर्थः॥ अत एवाकाशेऽली २०॥
नमनिलचेष्टितं येषां ते यावेदोक्तं शुभकर्मानुष्ठानेन चित्तशुद्ध्या योगाभ्यासलक्षणान्तरंगसाधनयुक्तानां
मित्यर्थः॥ अत एव देहादिष्वपि निस्पृहाणां ध्वस्तभवाटवीनां निरस्तसंसारमार्गाणां तत्त्व मुनीनां मननसी

पूज्योहमंधकरिपुश्च तथा विरंचिस्त्वाङ्गावनावितलयेव जगत्सु नित्यं॥ एतेपि केचन जयंति निर
स्तकामास्त्वद्भक्तिधौतमनसो भुवनेऽवधूताः॥ ३४॥ अपि स्वदेहादिषु निस्पृहाणामाकाशलीना
निलचेष्टितानां॥ त्वमेव कल्यानकृतां मुनीनामालंबनं ध्वस्तभवाटवीनां॥ ३५॥

लानां त्वमेवालंबनमाश्रयो नित्य इत्यर्थः॥ ३५॥ इदानीं प्रकरणार्थमुपसंहरति किमिति हे महेश्वर महतां ब्रह्मा
दीनां नियामक तय विभो अव्याहतैश्वर्य बहुधा विमृश्य विचार्योच्यते किं तदित्याकांक्षायामाह॥ सदिति सत्प्र
शस्तं अप्रशस्तं यद्वा सदसत् स्थूलसूक्ष्मं कार्यकारणरूपं वा किंतु इत्थं यत् त्वं नासि सर्वं ततोमितया सर्वं
त्वमेवेत्यर्थः॥ नन्वेवं सर्वत्रावस्थितं भवन्तं सर्वैरपि कथं नानुभूयत इत्याशंक्य यमैवेष वृणुते तेन लभ्य इति
श्रुत्यर्थं मनेनाह॥ ज्ञातुमिति येषां पुंसां चेतः अनुग्रहदशा अनुग्रह इह ध्यानपुनासि न पवित्रयसि तैर्ज्ञातु

मपिनशक्नासेकिंपुनर्द्रष्टुमितिभाव॥३६॥एकस्मैवत्तवदेहिदेहविभागरहितसच्चिदानंदरूपस्यव्याप
कत्वस्यपरिछिन्नत्वस्यचस्मरणाद्भयंसर्वेश्वराअपियथातथ्येनत्वापरिज्ञातुमसमर्थाइत्याहसाह्वाभ्यां
कोसितिक्वचायमित्यनेनपरिछिन्नत्वमपरिछिन्नत्वंचदर्शित॥एवंस्तुत्वाप्रार्थयतेत्वन्मायेति॥३७॥

किंतन्महेश्वरविभोवहुधाविमश्वत्वन्मासियत्सदपिवाप्यसदेववस्तु॥ज्ञातुंतथाप्य
परिमेघनशक्नसेत्तैर्येषामनुग्रहदृशानपुनासिचेत्तः॥२८॥कोसित्वंहेमहेशानाकिंतवाध
समीहितं॥अत्यद्भुतंतंवैश्वात्मंमुद्यामोयान्निरीक्षणात्॥क्वचायंमातुधोभावःक्वाप
मातिलौकिकंः॥त्वन्मयामोहितानांचस्त्वमेवशरणंभवः॥३८॥त्वमेववत्यत्वांसम्यक्
योसिसोसिमहेश्वः॥धोत्यसेनैवमानैस्त्वंखद्योतैःखमणिर्यथा॥३९॥अंतोस्तिपरमा
नूनांमरुत्तेजोवभूमिषु॥नांतोस्तित्वयिलीनानांब्रह्मांडानामखंडिते॥४०॥श्रीराम
पथातत्वेनत्वमेवात्मानंजानासीत्याह॥त्वमितित्वामात्मानंत्वमेववेत्थजानासिमासमानैरनुमानैरनुमा
नादिभिः॥त्वंनद्योतसेअत्रदृष्टांतः:खमणिःसूर्यःखद्योतैरिवेतिअयंभावः॥यस्मैत्वमात्मानंज्ञापयसितेनेव
नैवविदितोभवसीति॥३९॥किंचवाय्वादिपरमाणूनांगणनयांतोस्तुत्वखंडितेलीनानांलग्नानांब्रह्मांडानां

नीतिनिमिसय ॥४०॥

कानितानिब्रह्मांडानीत्यर्थपेक्षायामाह ॥ लक्ष्यंतइति ॥ ४१ ॥ ब्रह्मणांविलक्षणत्वंप्रपंचयन्नाह ॥ केचिदि
तिचतुर्भिः ॥ ४२ ॥ विचित्रानानाकारायासृष्टिस्तत्रकुशलाइत्यर्थः ॥ विचित्राण्यायुधानिवाहनानिचयेषांतेतथा
४३ ॥ ४४ ॥ ४५ ॥ एवमस्मदादयोपीत्याह ॥ एवमितित्वाहनानिचायुधानिचविग्रहाश्चतेतथावहुविधाआ
कारोयेषांतेतथात्वत्स्वभाप्रकाशस्यास्यांशादिभवोयेषांतेएवंत्वद्रूपज्ञानांअस्माकंअनुग्रहंकुर्विमाह ॥

लक्ष्यंतेयेनवहवोब्रह्माणोतिपराक्रमाः ॥ विभक्षणामिथश्चैतेस्वरूपायुधवाहनैः ॥ ४१ ॥ केचिच्चतु
र्मुखाःकेचित्पंचवक्त्राश्चषण्मुखाः ॥ दशवक्त्राःशतास्याश्चसहस्रवदनाअपि ॥ ४२ ॥ वहुवक्त्रा
वहुभुजावहुरूपास्तथापरे ॥ विचित्रसृष्टिकुशलाविचित्रायुधवाहना ॥ ४३ ॥ विचित्रशक्त
योभक्त्यात्वांनमंतिमहेश्वरं ॥ स्तुवंतिवहुभिःस्तोत्रैरेकेध्यायंतिनिश्चला ॥ ४४ ॥ त्वत्प्रात्युपा
यमन्योन्यंबोधयंतिविमत्सरा ॥ प्रयत्नासर्वभावेनत्वामेवशरणंपरं ॥ ४५ ॥ एवंवहुविधा
कारंवाहुनायुधविग्रहा ॥ विचित्रशक्तयोनंताहरयश्चकपर्दिना ॥ ४६ ॥

अनुग्रहीष्वेति ॥ ४६ ॥

४७ ॥ एवंविष्णुस्तुत्याप्रसन्नेश्रीरामेकिंवृत्तमित्यपेक्षायामाह ॥ श्रीभगवानुवाचेतिप्रसन्नात्मितान्स्तुतवान्नांश्च
तानितानीदृशान्येववदनानीति ॥ प्रहसन्वक्ष्यमाणांवाक्यमब्रवीत् ॥ ४८ ॥ अहमितिआत्मवेदमयस्त्वसी

स्वरूपविधिरितिचश्रुत्युक्तः॥ पुरुषाकारआत्माहंकीदृशं॥ परःसर्वोत्कृष्टः॥ पुरुषान्नपरंकिंचित्साकाष्ठासाप
रागतिरितिश्रुते॥ नित्यः॥ नित्योनित्यानामितिश्रुतेःसन्मात्रः॥ सदेवसौम्येदमग्रआसीत्इतिश्रुते॥ आनंदादेव
खल्विमानिभूतानिजायंतेआनंदोब्रह्मेतिश्रुत्युक्तकेवलानंदस्वरूपमात्रपदेनाचेतनलेशस्याप्यभावःसू २
चितः॥ आनंदरूपममृतंयद्विभातितदाप्रणास्वानंदमेवेतिश्रुते॥ आनंदमात्रकरपादमुखोदरादितिस्मृ

त्वत्प्रभाशांशविभवास्त्वांसदापर्युपासते॥ अनुगृह्णीष्वभक्तान्नःप्रसादाद्विश्वतोमुखः
४७॥ श्रीशुकउवाच॥ इतिस्तुतेनात्मतोरामोविष्णुनाप्रभुविष्णुना॥ प्रसन्नोत्फुल्लवदनो
प्रहसन्वाक्यमब्रवीत्॥४८॥ अहमात्मापरोनित्यःसन्मात्रोविभुरीश्वरः॥ सदसद्भावरहितो
भेदाभेदविवर्जितः॥४९॥ एकोद्वितीयोविकृतोनिराकारोनिरंजनः॥ मच्छक्तयोविश्वमिदं
भिन्नाभिन्नतयास्थितं॥५०॥

तेष्वविभुः॥ सर्वगतःईश्वरःसर्वनियामकः॥ सत्सूक्ष्मंकारणंमहदादिरूपं
असत्कार्यंविराजादिरूपंतयोर्योभावस्तद्रहितः॥ वेदाभेदशब्दाभ्यांव्यष्टिसमष्टिरूपंजगत्तद्विवर्जित॥४९॥
पुनश्चकीदृशः॥ एकः॥ स्वीगुणकर्मरूपादिभेदरहितः॥ स्वागतानांचभेदानामभावाद्ब्रह्मशाश्वतमितिस्मृतेः
पद्मईश्वराणांपरममहेश्वरएकोहमस्मिःकुतःयतोद्वितीयःसमाधिकरहितःतमीश्वराणांपरमंमहेश्वरमि ॥२५॥

तिश्रुतेः॥ न तत्समश्चाभ्यधिकश्च दृश्यत इति च॥ अक्रतो विकारशून्यः॥ निराकारः॥ आकृताकाररहितो तत एव
निरंजनः॥ सर्वोपाधिरहितः॥ नन्वेवं चेत्कथं कारनत्वमत आह॥ मच्छक्तय इति भिन्नाभिन्नतया व्याप्तिसम
ष्टिरूपेण स्थिति दिदं विश्वं मच्छक्तयो मायाद्याः कुर्वंति॥ ५०॥ यत्र यासु शक्तिषु त्वं विष्णुः॥ तत्वानां महदादीनां
मधिपः सुराः॥ अधिष्ठातारो देवाः॥ मदंशो विष्णुः तस्यांशो विराट् तस्यावलंबेनाश्रयत्वेन खे आकाशे स्वघो

यत्र त्वमन्ये वहवस्तत्वानामधिपाः सुराः॥ मदंशांशावलंवेन खे खद्योतवदासते॥ ५१॥
अहमेवादिरानंदो निरालंवः स्वराड्विभुः॥ सर्वः सर्वगतः शांतः शुद्धश्चैतन्यविग्रहः॥ ५२॥
आकाशस्यास्मि चाकाशो दिग्दिशामस्मि शाश्वती॥ कालस्यापि महाकालो ज्योतिषां ज्यो
तिरुत्तमं॥ ५३॥

तवदासते तिष्ठतीत्यर्थः॥ अत एवाहमेव सर्वेषामादिः कारणं आनंदस्वरूपः नि
रालंवः॥ आश्रयांतररहितः॥ तत्र हेतुमाह॥ स्वराट् स्वतंत्रो विभुर्व्यापकः॥ अत एव सर्वः॥ सर्वरूपः सर्व
रूपत्वे विकारित्वं निराचष्टे शांत इति॥ अत एव शुद्धः॥ विभुत्वेन किमाकाशादिवद्रूपरहितत्वमेवोच्यते ने
त्याह॥ चैतन्यविग्रहः॥ इति श्रुति॥ सच्चिदानंदात्मको भगवान्सच्चिदानंदात्मिकास्य व्यक्तिरिति॥ ५१॥ किंच आ
काशस्येति भूतानामवकाशप्रदस्याप्याकाशस्यावकाशप्रदोस्मि कालस्य सर्वग्रासकस्यापि यासको हं ज्योति

षांचंद्रादित्यादीनांज्योतिःप्रकाशकोहं ॥५३॥ कारणानांहिरण्यगर्भादीनामपिकारणमहमस्मिउक्तविशेषण
स्यात्मनोविभूतीरूपंदिस्याह ॥ कारणानामामितिकरणानांइंद्रियाणांमध्येमुख्यत्वाद्हंमनः ॥ अनूनांसूक्ष्मा
णांमध्येपरमाणुरहंतांभूधराणांमेरुः ॥ विभूनामाकाशादीनांमध्येयोधिकोविभुस्त्वेतन्याकाशः ॥ तत्वानामहदा
दीनांमुत्तमंतत्वमीश्वरतत्वंनिर्वाणमार्गाणांमोक्षसाधनानांमध्येयोगीभक्तियोगःसनातनो ॥ अनादिसिद्धः ॥ प्रा

कारणंकारणानांचकरणानांमहंमनः ॥ अनूनांपरमाणीयान्महतांचमहत्तरः ॥५४॥ विभुर्विभू
नामधिकस्तत्वानांतत्वमुत्तमम् ॥ योगोनिर्वाणमार्गाणांमहमस्मिसनातनः ॥५५॥ प्राणःप्राण
भृतामस्मिदमश्चास्मितपस्विनां ॥ शांतिरस्मिमुमुक्षूणांप्रणवोस्मिगिरामहं ॥५६॥ विधिःक्रिया
वतांवेस्मिनिवृत्तिरपियोगिनां ॥ दीक्षितानांरतिश्चास्मिविरतिश्चविवेकिनां ॥५७॥

णःसोहंतपस्विनांकृ
च्छ्रचांद्रायणादिव्रतपराणांयोदमइंद्रियनिग्रहः ॥ शांतिर्मनोनिग्रहः ॥ गिरांमध्येप्रणवः ॥५६॥ क्रियावतांकर्म
निष्ठानांविधिरहंयोगिनांनिवृत्तिः ॥ विषयेभ्यइंद्रियप्रत्याहारः ॥ दीक्षितानांयज्ञनिष्ठानांरति ॥ स्वर्गादिप्री
तिविवेकिनांनित्यानित्यविवेकवतांविरतिर्वैराग्यं ॥५७॥ इदानींमात्मविभूतीःसंक्षिप्याहसंसरिसूनांसमना ॥२९॥

म

ससावस्थामदर्थिनांमत्प्रार्थिनांमोक्षावस्थालोकेयत्किंचित्परममुत्कृष्टंतत्सर्वमहमस्मि अव्यक्तेतेजो
पस्यसतं ॥ ५८ ॥ अव्यक्ततेजसामयेदंव्याप्तमित्युक्तातदेवरूपंगृहीतवानित्याह ॥ इतीतिसर्वेषांदेवा
नांपश्यतामेवेतिपूर्वोक्तंब्रुवन्मानुषंभावविश्वरूपतांजगृहे ॥ ६० ॥ महो तथा वैश्वात्म्यमपि विसृज्य
परमाकाशतांपरमप्रकाशरूपतामेत्यातरएवालक्ष्यः ॥ कोटिसूर्यप्रकाशाव्रतत्वेनदृष्टुमशक्योऽ

महोपनिषदंविधायासंगृह्य कथयामिते ॥ समन्तात्संसरिष्णूनांमुमुक्षूणामस्मिमदर्थिनां
५८ ॥ यत्किंचित्परमंलोकेतत्तदस्मिजनार्दन ॥ मयाव्याप्तमिदंविश्वमव्यक्ततेजसा —
— ॥ ५९ ॥ श्रीशुक उवाच ॥ इतिब्रुवन्नचिंत्यात्मासर्वेषामेवपश्यतां ॥ विसृज्यमानुषंभा
वंवैश्वात्म्यंजगृहेतथा ॥ ६० ॥ तथाविसृज्यवैश्वात्म्यंस्वानंदेनातिबृंहितः ॥ परमाकाशता
मेत्यरामोलक्ष्यस्ततमब्रवीत् ॥ ६१ ॥

मस्तांविष्णुमब्रवीत् ॥ एतेननिराकारसाकारप्राकृतरूपाणि
ममेतिदर्शितंभवतिकिमब्रवीदित्याकांक्षायामाह अथमूर्तेरितिहेरमेश अदृष्टामूर्तिर्विग्रहोयस्य सू०
सतस्माज्जगदपुनरंतुमिच्छोः ॥ परस्मान्मत्तः ॥ पूर्ववन्निरंतरस्याकाशस्यसूक्ष्मरूपमभवत् ॥ ततोवाराजा
दिहृदर्केऽउत्तरकालभावीअखिलवाक्ययंच ॥ अखिलवाचांप्रपंचोविस्तारोयस्मिन्ससंसारोमदिच्छयैवाभूत् ॥ ६२

॥रा गी॥

॥२७॥

लीनप्रकृतिप्रपंचेयस्मिन्नप्येवलीनेसति॥ एकोद्वितीयःसाक्षादहमेवस्फुरामि॥ योगोत्थितेतियोगोष्टांगस्त्रया
समाधिस्तत्रजीवेब्रह्मणिउपगतेसतिउत्थितेनप्रादुर्भूतेनयेमयायतीनांप्रयत्नशीलानांइहएवदेहेऽमृतत्वे
ममरत्वमपिभवेत्तथाचयोगशास्त्रेईश्वरप्रणिधानाद्वेति॥ अथवायोगोत्तानयोगस्तत्रयः॥ सर्वत्रब्र-
ह्मानुभव॥ श्रीरामउवाच॥ तत्रोत्थितेनयेनमयापतीनामात्मस्वरूपप्रपतनशीलानांइहएवदे

श्रीरामउवाच॥ अहमभूवनरभवद्विरंसोर्मनोरमेशाध्वनिरंबरादिः॥ मदिच्छयैवाखिल
लोकपंचस्ततःपरस्मादुदभूद्दुदर्कं॥ ९२॥ लीनेचयस्मिन्नत्वयमद्वितीयःस्फुरामि
साक्षादहमेकएवयोगोत्थितेनाप्यमृतत्वमेषांभवेद्यतीनामिहएवयेन॥ ९३॥ इतो
ऽप्यमायात्मभवेविधातुःपुरात्वतीतायकृशानुशीलैः॥ मयोपदिष्टंगगनादिसृष्टेःप्रागे
वकालोत्तरमाद्यतंत्रं॥ ९४॥

हेऽमृतत्वंजीवन्मुक्तत्वमपिभवेत्॥ एतदेवोक्तंभगवताकृत्स्नेनत्रस्त
भूतःप्रसन्नात्मानशोचतिनकांक्षति॥ सम॥ सर्वेषुभूतेषुमद्भक्तिंलभतेपराम्इहएवेमत्रसंधिरार्षः॥ ९५॥
मदुपभाप्ययायतीनापाब्रह्मणाउपदिष्टवानस्मीत्याह इतइतीइतोऽस्माद्विधातुर्ब्रह्मणोऽप्यमायातीता
योत्मभवेकृशानुशीलैस्तानाम्नेपुरापूर्वंगगनादिसृष्टेःप्राक्॥ आद्यतंत्रंरामनामाख्यमुपदिष्टं॥ ॥२७॥

तदेवसकामेनसेव्यमानंसत्कालोत्तरंकालोपलक्षितंलोकाल्लोकांतरगमनरूपमुत्तरफलंयस्मात् ॥
तदेवनिकामेनसेव्यमानाद्दग्धज्ञानरूपंभवति ॥ यच्चरामनाम्नमीमांसाविश्वसृजांब्रह्मादीनांयत्रैवसक
लावेदाः ॥ ऋग्यजुःसामाथर्वरूपाद्दृष्टाब्रह्मणेतिशेषः ॥ येर्वेदैरयमात्ममंत्रः ॥ पूर्वकल्पेयथास्थितंवि
श्वंविधत्तेकरोतीत्यर्थः ॥ ९४ ॥ यदक्षराणांयस्यरामनाम्नोक्षराणिवर्णास्वरूपाणिपत्रैवमदंतराणेस्फुरंति ॥ ९७ ॥

तदेवदृग्विश्वसृजामीमीमांसायत्रात्मतत्त्वंविप्रतंयथावत् ॥ यत्रैवदृष्ट्वासकलाश्च
वेदायैरात्मभूर्विश्वमयंविधत्ते ॥ ९५ ॥ व्योम्नोवताराणियदक्षराणिस्फुरंतिचात्रैवम
दंतराले ॥ मध्यमपत्वमममुखामुरारेयैर्व्यक्तिमायांतिःसुराःसमस्ताः ॥ ९६ ॥ येभ्यःसमुद्ध
त्यमयोपदिष्टमुपास्यतेतारकमंत्रमंत्र ॥ स्वस्यंत्यनेनैवजगतिरुद्रासिद्धाश्चसाध्याश्च

श्चत्रदृष्टांतः ॥ व्योम्नाकाशेत्ताराणीवतारकाणीवयेरक्षरैस्त्वप्रमुखासुरादेवमद्धश्मयोमदंशाव्यक्तिंप्रा
दुर्भावमाप्नुवंतीत्यर्थः ॥ उक्तंचैतन्महासुंदरीतंत्रे ॥ रकाराज्जायतेब्रह्मारकाराज्जायतेहरिः ॥ रकाराज्जा
यतेशंभूरकारात्सर्वशक्तयः ॥ इति ॥ ९६ ॥ किंचयेभ्योनैरामनामक्षरेभ्योरामनाम्नोवद्दवर्णात्वंस्पष्टंमहा
रामायणे ॥ रामनाममहाविद्येषड्भिर्वस्तुभिरावृतंब्रह्मजीवमहानादैस्त्रिभिरम्हद्दामिते ॥ स्वरेणविंदुना

चैवाद्धियामायापि चेति तारकमंत्रं समुदस्य मयोपदिष्टं तं तारकमंत्रं षडक्षरमुपास्यानेनैव मंत्रप्रभा
वेण रुद्रादिरूपा ॥ संतो भूयः ॥ पुनश्च जगत्स्रष्टकरिष्यंतीत्यनेन रामनाम्ना ॥ षडक्षरो भवतीति षडक्षरराद्धा मना
मभवतीति सुधीभिर्ज्ञेयं श्रुतिदर्शितं भवति ॥ ६७ ॥ न केवलमयमंत्रः रक्षादिहेतुः ॥ किंतु मुक्तिहेतुरपी-
त्याह ॥ अनेनेति अनेन मंत्रेण वालखिल्याः ॥ ब्रह्मणः पुत्राः ॥ वैखानसा वानप्रस्था ॥ महत्तत्वेत्तसः ॥ मयि गतं

अनेन मंत्रेण च वालखिल्या वैखानसा महत्तत्त्वेन सोऽत्र ॥ दृष्ट्वैव सम्यगसुविधूतपापमा
मेव पश्यंति च चक्रपाणे ॥ ६८ ॥ प्राणांस्त्यजंतो मणिकर्णिकायां महाव च कंतारकमुच्च
रंतः श्रुत्वा च वेदांतमुपास्य वाच्यं पश्यंति मामेव हि विश्वनाथं ॥ ६९ ॥ अयं च मैत्रावरुणा
द्विधातुरस्मात्तृतीयो भविता स्वयंभूः ॥ व्यासश्च विष्णुर्भविता चतुर्थः स्कंदो महेशोऽस्मादपि

चेतो येषां ते सम्यग्दृष्ट्वा ज्ञानेन मामेव पश्यंति साक्षात्कुर्वंति ॥ ६८ ॥ उच्चरंत उच्चारणं कुर्वंतः ॥ प्राणांस्त्य
जंतो ये विश्वनाथं शिवं पश्यंति ते च मामेव पश्यंति अर्थान्मुक्ता भवंति उच्चरंतमिति पाठे विश्वनाथमित्य
स्य विशेषणं ॥ ६९ ॥ मैत्रावरुणिरगस्त्यः अस्माद्विधातुर्ब्रह्मणस्तृतीयः ॥ स्वयंभूर्ब्रह्मा भविता भविष्यतीत्या
सश्च विष्णुर्भविता ॥ स्कंदः कार्तिकेयः ॥ अस्माच्छूलपाणेश्चतुर्थो महेशः ॥ शिवो भविष्यति ॥ ७० ॥ मत्प्रासुपा

यस्य मंत्रराजस्य प्रार्थनार्थं प्रकटनार्थं एते ब्रह्मणो मया बहवो नियुक्ताः प्रेरिताः॥ यूयं च विभोर्भावो वैभवं
तस्य बोधनार्थं रुद्रास्तत्स्वमतिकल्पितैरागमाभासैर्मत्स्वरूपाच्छादनहेतवे च॥७२॥ तथामी विश्वसृजो ब्र
ह्मणः पुत्राः प्रपंचमुख्याः जगत्सृजमुख्याः॥ श्रुतिमस्तकेषूपनिषत्सु मया नियुक्ताः प्रधाना भवंती॥ अमी रुद्रा
श्च सर्वेषु शास्त्रेष्वागमेषु रुद्रयामलादिषु मुख्यतमा आचार्याः॥७३॥ अन्यदपि मद्वैभवं शृणु इत्याह॥ ममेति

मत्प्राप्त्युपायप्रथनार्थमेव ब्रह्माणा एवं बहवो नियुक्ताः॥ यूयं च मद्वैभवबोधनार्थं रुद्रा
मदाच्छादनहेतवे च॥७२॥ वेदेष्वमी विश्वसृजः प्रधानाः प्रपंचमुख्याः श्रुतिमस्तकेषु
सर्वेषु शास्त्रेषु तथागमेषु रुद्रा अमी मुख्यतमा भवंति॥७३॥ ममैकांशे जगत्यस्मिन्प्र
तिगोलमवस्थिताः॥ तत्तद्गुणाधिपतयो ब्रह्मविष्णुकपर्दिनः॥७४॥ तत्रांडकोशे चै
तस्मिन्मुंजकेशो यमात्मभूः॥ विष्णुपालयिता चास्य त्वमंडस्यामरतेश्वरः॥७५॥ श्रीराम

ममैकांशेऽस्मिन्जगति प्रतिगोलं प्रतिब्रह्मांडगोलं तत्तद्रज॥ सत्वतमोलक्षणगुणाधिपतयो ब्रह्मादयो म
न्नियोगेनावस्थिताः संति॥७४॥ तत्रेति तत्र ब्रह्मांडेषु मध्ये एतस्मिन् ब्रह्मांडे इत्यंगुल्या निर्देशो ब्रह्मांडां
तरे विष्णोरनेकब्रह्मांडप्रदर्शनात्॥ मुंजकेशः इति नाम्ना प्रसिद्धो मन्नियोगं निर्वर्तयतीत्यर्थः॥ अस्य

॥ रा॰ गी॰ ॥

॥ २९ ॥

यस्तारस्य पालक पितारक्षकः ॥ अमतेश्वर इति नाम्ना प्रसिद्धः ॥ मनियोगं निवर्त्तयति ॥ ७५ ॥ अहिर्बुध्नना
म्नार्मत्सिद्धोसोरुद्रोपि संहरिष्यति मया नियुक्त इतिशेषः ॥ ७६ ॥ इदानीं मात्स्यमनोरावरणादीनां चावतारप्र
योजनं वक्तुं यद्रूपक्रमते मनमावितिद्वयेन मामावयं भुवो मनुस्त्वदंशोयः ॥ स दशरथो नृपो भूत्वा दशरथो
हि निमित्तं तस्य चेशात ॥ स्वायंभुवो हि मनुः ॥ श्रीरामचालसुखानुभावार्थं रैदसरथे प्रविष्ट एवं कश्यपो

कदाप्यसावहिर्बुध्नः संहरिष्यति तत्पुनः ॥ अस्याधिश्वरजः सर्गो भुवनानि चतुर्दश ॥ ७६ ॥
मनमाविति त्वदंशोयमभदशरथो नृपः ॥ पश्चाद्यतीर्णा मां सर्वे च वदं त्वजमपि प्रभु ॥ ७७ ॥
आदौ गुणानामधिपं नवद्विरमरेश्वरैः ॥ मयि वसिष्ठैः क्रीडार्थे स्वाचि स्थिस्यं तकारतो ॥ ७८ ॥
स्वेषु स्वियुक्तकल्पेषु मपत्तमंसुदारुणां ॥ अमृतेरपिमे निम्परूपस्यास्यादिहेछया ॥ ७९ ॥

त्पियपद्धे यतीर्णमपि मां अजं प्रभुं वदंति श्रयं भावः ॥ यदा यदा हि ममावतारो भवति तदा तदा दशरथोग्र
हे भवतीत्येवं सनातनेनावतीर्णमपि मां तत्त्वदर्शिनो जं वदंतीति पदि हासोऽकरिरिति ॥ ७२ ॥ आदाविति
गुणानां सत्त्वरजस्तमसामधिपं नवद्विरिहलोके स्वेयुकल्पेषु सुदारुणां तपस्तप्तां मितिद्वितीयेनान्वयः
॥ ७७ ॥ अपनेप्राकृतमूर्त्तिरहितस्यापि मे स्वरूपस्यास्यादिहेछया इष्टमिच्छया ॥ ७८ ॥ ॥ २९ ॥

तदानींविश्वावसुनामायंगंधर्वोपिसामवेदस्ययानिशाखासहस्राणितानिवेत्तीतथाकिमर्थंमि
त्तिवेदतत्राह नीरूपमितिमायया॥ सर्वजगतोवशीकरणात्वान्महामायाविमोहितोपिसामा-
भिः॥ सामशाखाभि॥ गायंगायंमामेवदृष्टुंतोषयामासकीदृशंमांनिरूपंप्राकृतमूर्त्तिरहितंअर्था
दिव्यमूर्त्तिसहितं॥७८॥ तस्यमहामायाविमोहितस्यत्वमाह॥ मर्त्यरूपमिति॥ अनेनगंधर्वेणतत्त्वंस

साकंभवद्भिर्गंधर्वो विश्वावसुरपिस्वयं॥ सहस्रसत्रैरिष्ट्वामांसामशाखासहस्रवि
त्॥७९॥ मामेवतोषयामासगायंगायंचसामभिः॥ नीरूपमपिमांदृष्टुंमहामायावि
मोहितः॥८०॥ मर्त्यरूपमनेनापिवृत्तंतत्त्वमजानता॥ निवृत्यधर्मानुत्सृज्यकाम्यकर्मा
णिकुर्वता॥८१॥ एकसत्त्वमपिप्राप्तममूर्त्तेर्मूर्त्तिमिच्छता॥ प्राप्तंत्वानेननिधनंमुक्तएवा
स्मद्दुर्लभं॥८२॥

त्त्विदानंदात्मकरूपमजानतामर्त्यरूपंमरणधर्मात्मकंरूपंप्राप्तंमरणधर्मात्म
कोयंराजकुमारइतिवृत्तंस्वीकृतं॥ अतएवनिवृत्तधर्मानुत्सृज्यत्वाकाम्यकर्माणिकुर्वताकाम्यक
र्मनुवेगुणपाद्राक्षसत्वंप्राप्तमितिद्वितीयेनान्वयः॥८१॥ अमूर्त्तेप्राकृतमूर्त्तिरहितस्यमेप्राकृतमूर्त्ति
रेवायमितीच्छतायपरपत्तानेनमत्तः॥ सकाशादेवनिधनंप्राप्तं॥ एवंभूतोप्ययंसामभिर्मसंतोष

करणान्मत्तो निधनान्मत्सायुज्यं सहपुनर्न्मीतिसपुर्केस्वभावः ॥ सायुज्यं समीपवर्त्तित्वमुपेष्यति प्राप्स्यति ॥ २३ ॥ क
दा प्राप्स्यतीत्याकांक्षायामाह रावण इति मनुत्वं प्राप्स्यति ॥ पुनश्चेंद्रत्वमासाद्य अखिलमुपयास्यतीति द्वितीयेना
न्वयः ॥ २४ ॥ २५ ॥ उद्दालकऋषेः पुत्रः कुशनाभ इति नाम्ना ख्यातः ॥ निहृत्तधर्मैर्वेदांतभागोक्तैर्मामिष्ट्वाराध्य ॥ २६ ॥

रावणोयं महाबाहुर्मनुत्वमुपयास्यति ॥ पुनरिंद्रत्वमासाद्य भुक्त्वभोगान्यथेप्सितान् ॥ २४
गुरोस्तु वामदेवस्य नित्यं शुश्रूषणे रतः ॥ कुशनाभ इति ख्यातेऽखिलमुपयास्यसि ॥ २५ ॥ अ
थैरुद्दालकस्याथ पुत्रो योगविदांवरः ॥ निहृत्तधर्मैर्मामिष्ट्वा मत्सायुज्यमुपेष्यति ॥ २६ ॥ मंदि
रे गुरुणा शप्तः करावसो यं विभीषणः ॥ कल्पादत्वमपि प्राप्य न जहौ धर्ममुत्तमं ऐंद्रपद
मनेनेह यावत्कल्पमभीरुणा ॥ मोक्ष्यते मत्प्रसादेन मद्धाम प्राप्स्यते ततः ॥ २८ ॥ रामराम

एवं रावणवृत्तांतमुक्त्वा विभीषणस्याह ॥ मंदरे इति केनचिदपराधेन गुरुणा शप्तः ॥ सन् कल्पादत्वं राक्षस
त्वं ॥ उत्तमधर्मं मा इक्ति योगाख्यं ॥ २७ ॥ अनेन विभीषणेन इह लंकायामेव ततश्च मद्धाम साकेताख्यं ॥ २८
विभीषणस्य वृत्तमुक्त्वा हनुमतो वृत्तमाह यदि तिपद्मोले यस्मिन्ब्रह्मांडे नैव भू ॥ अथोत्तत्वं नास्ति ॥ अपश्च न संति
किंतु सर्वदा त्रीणि भूतानि तेजो वाय्वाकाशरूपाणि तत्र चाग्निः ॥ शीत नामा मारुतस्तीव्रत्यामा अपतापनिव्र

ध्नाख्याः॥ तत्रजंत्रवोवह्नेरग्रेजायंते॥ कामस्वरूपंयेषांकेसुखानामुल्बणमाधिक्यंयेषांतेवह्निमेवभुंजतीतित
थावायुमार्गाः॥ वायोर्मार्गआकाशः॥ सएवमार्गोयेषांतेचतएवमनोजवाः १९॥ तत्रब्रह्मांडेएकपादितिनाम्नाः
प्रसिद्धोरुद्रोयंहनुमान्मत्परायणः॥ अहमेवपरमयनमाश्रयोयस्यसः॥ एनंहनूमंतंपर्युपासतेसदोप
तिष्ठंति॥ २०॥ मद्भक्त्यालब्धोयोगोमत्साक्षात्कारोयेनचतएवमत्प्रसादेनात्मवैभवमैश्वर्यः॥ येनसः किंचा

यज्ञोल्लेनैवभूर्नापरक्षीणाभूतानिसर्वदा॥ शीतोग्निर्मोहनस्तीव्रोव्रध्नाख्यश्चप्रजाप
तिः॥ १९॥ जायंतेजंतवोवह्नेः कामरूपाः सुखोल्बणाः॥ व्योमगेहावह्निभुजोवायुमार्गाम
नोजवाः॥ २०॥ तत्रैकपादभ्यंहद्रोहनुमान्मत्परायणः॥ द्वात्रिंशदर्बुदाम्येनंरुद्राणांप
र्युपासते॥ २१॥ मद्भक्तलब्धयोगस्तुमत्प्रसादात्मवैभवः॥ आपदुद्धारणाख्यायंभज-
तांनात्रसंशयः॥ २२॥

मेषामपिस्वभक्तानांभोगमोक्षप्रदानेसमर्थइत्याह॥ आपदुद्धारणइति
२२॥ इदानींगुह्यमपिसीतायास्तत्त्वंवक्तुमुपक्रमतेसंग्रहेणेतिसंग्रहेणासंक्षेपेण॥ २३॥ गुह्यमेवाह॥
येयंमितियेयंसीताभवद्भिर्भिन्नेवदृश्यते॥ सेयमभिन्नापेममक्रीडनःशक्तिः॥ इयमेवमहामायाम
हतीकृपातामिमांविश्वरूपिणीजानीध्वं॥ २४॥ नन्वस्याः कथंविश्वरूपत्वंतत्राहइयमेकापिविचित्रा

॥र.गी.॥ नत्रशक्तिमत्तमाज्ञार्य्यैश्वर्यमित्यादिकंकारणंमहदादिकंतद्रूपेणविशेषेणावर्त्तते॥ अस्यास्तत्वंहृद्द्येय
॥३१॥ मित्याहनस्याइति॥ ९५॥ अस्याएवमुक्तिहेतुत्वमित्याह॥ परैस्तैश्चत्वारिवाक्परिमितानिपदानीत्याद्या
नि॥ श्रुतिभिर्यावरावाक्प्रोक्ता॥ अतोऽस्यास्तत्वज्ञानेनमुक्तिर्भवतीत्याह॥ ययेति॥ ९६॥ इदानीप्रकाशरू

संग्रहेणप्रवक्ष्यामिगुह्यमन्यत्वमच्युत॥ येनविज्ञानमात्रेणछिद्यन्तेसंशयाःस्वयं॥ ९२
देहंसीतामहामायाशक्तिमेक्रीडतःसदा॥ भिन्नेवदृश्यतेभिन्नाजानीध्वंविश्वमेवतां
९४॥ कार्यकारणरूपेणायमेकाविवर्त्तते॥ अस्यास्तत्वंनजानातिदेवास्तत्रमुखाग्र
पि॥ ९५॥ परावाक्श्रुतिभिःप्रोक्ताययामुच्येतबंधनात्॥ ९६॥ नयत्रशक्तिशक्तित
त्वानिनपरानैवकिंचन॥ तदेवपरमंव्योमभावाभावविलक्षणं॥ ९७॥ श्रीरामापन्नः

यस्यञ्चस्वरूपमस्त्वमाह॥ यत्रेति यत्रपराकारणरूपाशक्तिर्मायानास्तिनत्वानिमहदादीनितत्कार्य्यंच
किमपिनास्ति अथवापराजीवरूपाशक्तिः॥ उक्तंचैतद्भगवताकृष्णेन॥ भूमिरापोनलोवायुःखंमनोबु
द्धिरेवच॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा॥ अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां॥ जीवभूतां
महाबाहोययेदंधार्यतेजगदिति॥ तदेवपरमंव्योमाकाशादेरप्यधिष्ठानंभावाभावरूपेभ्यः॥ सर्वेपदार्थेभ्यो ॥३१॥

ल विंक्ष्यसां॥९७॥उक्तलक्षणात्तद्ब्रह्मस्वरूपंमद्रूपंमदीयंरूपंयद्रूपापेतद्वैश्वात्म्यमपिरूपंहेयमुपेक्ष्यंनियं
स्यात्॥९८॥यत्रद्रूपेमानान्यनुमानादीनिकुंठीभवंतियन्निरूपयितुंनशक्नुवंतीत्यर्थः॥तत्परमंनिर्वाण
मुक्तस्वरूपंमदनुग्रह॥प्राप्तंभवेत्साधकस्येतिशेषः॥९९॥मद्भक्तिमतांतुमत्प्राप्तिर्भवतीत्याह॥मद्भावे

मद्रूपमचलंनित्यंसत्यमाद्यंतवर्जितम्॥तदेतदपिवैश्वात्म्यंहेयंस्यादुपेक्ष्यया॥९८॥
यत्रकुंठीभवंत्येवमानानिसकलान्यपि॥परमंतद्धिनिर्वाणंमदनुग्रहतोभवेत्॥९९॥
मद्भावभावितात्माथयूयंमन्मयाश्चभविष्यथ॥स्वस्वकर्माणिकुर्वंतोरमध्वमकुतोभया
१००॥श्रीशुकउवाच॥इतिरामवचःश्रुत्वासुराविष्णुपुरोगमाः॥शिरस्यंजलिमाधा
यप्रनिपत्यपुनःपुनः॥१॥जपंतोरामरामेतिशब्दब्रह्मपरायणाः॥स्मरंतस्तस्यवैश्वा
त्म्यमनुसंदधिरेचतं॥२॥

त्तिमयियोभावःप्रीतिःतयाभाविता॥भूयामन्मयामद्रूपाभवि
ष्यथस्वस्वकर्माणिजगत्पालादीनि॥१००॥एवंश्रीरामेणोक्ताः देवाः किमकुर्वन्नित्यपेक्षायामाहइ
तीति॥१॥तद्वैश्वात्म्यंस्मरंतस्तंश्रीराममनुसंदधिरेहृदिनिहितवंतः॥२॥इतिश्रीविष्णुगीतास्तो
त्रफलमाह॥स्तोत्रमितिहरिणाविष्णुनाप्रणीतंकथितंप्रणिपत्यनमस्कृत्यविष्णोःश्रीरामस्यप

॥रा॰गी॥ रमंपदंसंकेलारवं ॥ ५ ॥ इतिश्रीमहाराजकुमारश्रीविश्वनाथसिंहदेवविरचितायांश्रीरामगीताटीकायांद्वि
॥३२॥ तीयोध्यायः ॥ २ ॥ एवंहरिहरहिरण्यगर्भादिदेवैर्दितेसर्वलोकैकेश्वरेस्वभासाभासितानेकब्रह्मांडेसाकेतधीरे
भगवतिश्रीरामेस्तुतेप्रसन्नेचसतिकिंवृत्तमित्यपेक्षायामाह ततइति शंभुमुखोद्भवैः स्तोत्रैस्तस्यक्तोयसंहारम्

स्तोत्रंपठेद्योहरिणाप्रणीतंरामंविभुंनंप्रणिपत्यमूर्ध्ना इंद्रादिलक्ष्मीमनुभूयचांतेपदंचवि
ष्णोपरमंसगच्छेत् ॥ ३ ॥ इतिश्रीस्कंदपुराणेनिर्वाणखंडेश्रीरामगीतायांद्वितीयोध्या
यः ॥ २ ॥ श्रीशुकउवाच ॥ ततस्यक्तोयसंहारंस्तोत्रैःशंभुमुखोद्भवैः ॥ भूयःप्रसन्नवदनंवि
ष्णुगीतैरपिस्तवैः ॥ १ ॥ परंभावंतिरोधायसूक्ष्मेभावेप्रतिष्ठितं ॥ रामविश्वेश्वरंब्रह्मास्तोतुं
समुपचक्रमे ॥ २ ॥ नमःपुंसेपुराणायषड्विंशायमहात्मने ॥ उद्भवस्थितिसंहारमूलबीजा
यतेजसे ॥ ३ ॥

प्रसंनवदनंचततोविष्णुगीतैःस्तवैर्भूयोधिकप्रसंनवदनंरामंब्रह्मास्तोतुंसमुपच
क्रमेइतिद्वितियेनान्वयः ॥ १ ॥ परंभावंवैष्णवंविष्णोतिरोधायऐश्वर्यादिलक्षणंभक्तस्यर्थ्यतदपेक्षयासूक्ष्मेभावेहै
रण्यगर्भेप्रतिष्ठितंस्थितम् ॥ २ ॥ तामेवस्तुतिमाहनमइतिपुराणायसनातनायपुंसेसदाकिशोरावस्थाया
विष्टतस्वरूपायतत्रहेतुमाहषड्विंशायेतिमहत्त्वादिजीवेश्वररूपेणपंचविंशतितत्त्वरूपायातत्रएवमहात्मने ॥३२॥

विश्वोद्भवादीनांमूलंकारणंतस्यापिवीजायकारणायकार्य्यंप्रथिव्यादिकारणंप्रकृत्यादिकर्त्ताब्रह्मा
दिस्तेभ्योविलक्षणापदायविलक्षणास्वरूपायेत्यर्थः॥ सर्वेवेक्षणेपेहेतुमात्रत्रिगुणातीतमूर्त्तयइतित्रि
वेदीऋग्यजुःसामरूपाचक्षुर्यस्यसतत्स्यः॥ त्रिगुणातीतत्वेकथंकारणत्वमित्यत्रा॥ शंकामाहतुभ्यमितिधर्मे
ब्रह्मरूपत्वेपिब्रह्मणांपतयेपालकायविश्वभर्त्रेविश्वपालनकर्त्रे॥५॥ रुद्रायरुद्ररूपायननुकथंतत्तदे

कार्य्यकारणकर्त्तृभ्योविलक्षणापदायते॥ त्रिवेदीचक्षुषेतुभ्यंत्रिगुणातीतमूर्त्त
ये॥४॥ तुभ्यंविश्वसृजेधात्रेब्रह्मणांपतयेनमः॥ विष्णवेविश्वभर्त्रेचविष्णूनांपत
येनमः॥५॥ रुद्रायविश्वसंहर्त्रेरुद्राणांपतयेनमः॥ विश्वेदेवायमहतेनमस्तेपरमा
त्मने॥६॥ स्वेच्छयापंचविंशायकूटस्थायाविनाशिने॥ नितत्वायनमस्तुभ्यंतत्वानां
पतयेनमः॥७॥

वरूपत्वमित्याशंक्यांतर्यामित्यादित्याहपरमात्मनइति॥६॥ स्वेच्छयापंचविं
शतिर्जीवतद्रूपायतत्कुतइत्यतआहकूटस्थायेतिकूटोजीवानांसमूहस्तत्रांतर्यामितयातिष्ठतीति
कूटस्थस्तस्मैयेआत्मनितिष्ठन्यस्यात्माशरीरंयमात्मानवेदयआत्मानमंतरोयमयतीतिश्रुतेर्नि
त्तत्वायमहदादितत्त्वरूपाय॥७॥ किंचनियत्यामर्यादयाक्रांतनिर्मितंविश्वंयेनसततस्मैनियतेर्मर्यादा

या॥ अपि नियंतेते विश्वकर्मसु एको मुख्या साक्षी विश्वकर्मैकसाक्षी तस्मै अत एव निष्कपायअक
र्तृत्वात्प्रपंचस्य निष्क्रियं मां वदंति हि मायागुणैर्यतो मेंशाः कुर्वंति सर्जनादिकं न करोमि स्वयं किंचित्स्वा
दिकमहं शिवजे॥ ८ वेति स्मरणान्निष्क्रियाय॥ ८॥ इदानीं यज्ञरूपत्वेन स्तौति॥ प्राग्दशेति प्राग्दशा
यवादिरूपेण त्वं॥ हविर्भवसि तस्मै प्रत्यग्दृष्या हविर्भुजे देवतारूपाये इत्यर्थः॥ तयोश्च साक्षि॥ प्रत्यग्दृष्टो येहो

नियत्याक्रांतविश्वाय नियंतेनियतेरपि॥ निष्क्रियाय नमस्तुभ्यं विश्वकर्मैकसाक्षिणे॥ ८॥ प्रा
ग्दशा हविषे तुभ्यं प्रत्यग्दृष्या हविर्भुजे॥ तयोश्च साक्षिणे होत्रे नमस्त्रेधास्थितात्मने॥ ९॥ क्रि
याशक्तेऋचो रूपं ज्ञानशक्तेर्यजूंषि च॥ सामानि चेच्छाशक्तेस्तेप्यथर्वांगिरसो विभो॥ १०॥ श्री
र्लोकार्पे सदैवास्ते मनसीच्छा सदाशिवा॥ वाचि साक्षाद्भगवती सवतीसहैवास्ते सरस्वती॥ ११॥

ता तद्रूपाय एवं पराग्विषयदृष्याह विरादिरूपेण भोक्तृरूपेण होतृरूपेण त्रेधास्थित आत्मा स्वरूपं यस्य
स तस्मै एतेन सर्वरूपत्वं श्रीरामस्य सारितं मुद्राश्च हरेः॥ शरीरमिति स्मारणात्॥ ९॥ वेदरूपत्वं प्रपंचयन्ना
ह याऋचस्तवक्रियाशक्तेरूपं यजूंषि ज्ञानशक्तेः॥ सामानि चेच्छाशक्तेः अथर्वांगिरसश्च॥ १०॥ श्रीरिति विरू
पस्य ते मन्त्रैः श्रीर्ज्ञानशक्त्यात्मिका लक्ष्मीः इच्छारूपिणी शिवा पार्वती वाचि सरस्वती च॥ ११॥ विश्वमूर्त्तेस्तवा ॥३३॥

नांतानिवर्णानिवैखरीसाचतववागिंद्रियेवर्त्ततेयामध्यमासातवचेतस्येतस्मिंवर्त्तत इत्यर्थः ।। १२ ।। यापश्यंती
साउत्तमंयथाभवतितथात्तवबुद्धौवर्त्तत इत्यर्थः ।। १२ ।। याथसर्वत्रव्यापकस्वरूपंपरमंपदंपरमस्वरूपंतव
स्वरूपेवर्त्ततेकीदृशंतत् ।। आर्द्यसर्वकारणंगुणातीतंगुणेभ्योरहितंअतएवसदोदितम् निर्वाणंमोक्षस्वरू
पंअतएवाक्षयम् ।। १३ ।। सच्चिदानंदात्मकविग्रहस्यप्राकृतत्वंनिषेधतिनेतिनिराकारस्यप्राकृताकाररहितस्य

विश्वमूर्त्तेरनंतानिवर्णानितववैखरी ।। मध्यमामध्यमंचेतःपश्यंतीधीस्तवोत्तमम् ।। १२ ।। आ
द्यंपदंतदध्यक्षंगुणातीतंसदोदितम् ।। निर्वाणमक्षयंसाक्षात्परात्मपरमंपदम् ।। १३ ।। तस्या
नानिनचाकारोनरूपाणिनहेतयः ।। नवाहनानिनाकल्पानिराकारस्यतेविभो ।। १४ ।। विश्वामर
नराकाराभक्तानुग्रहहेतवे ।। क्रियंतेभवतानानाधर्मसंस्थापनायच ।। १५ ।।

तेस्थानानिशरीर
संस्थानविशेषाः ।। आकारोरूपंहेतयः ।। शार्ङ्गादीन्यायुधानिवाहनानिरथादीनि आकल्पाभूषणानिएतानि
तवप्राकृतानिनसंतितथाचश्रुतिः ।। सच्चिदानंदात्मकोभगवान्सच्चिदानंदात्मिकास्यव्यक्तिर्बुद्धिमान्मनो
मानंगप्रत्यंगवानिति ।। १४ ।। तैर्नैवरूपेणविश्वामरनराकाराभवताक्रियंते ।। विश्वाकाराः ।। मत्स्यकूर्मवराहनर
सिंहादयः ।। अमराकाराउपेंद्रादयः ।। नराःकृष्णपरशुरामादयः ।। एतेआकाराभक्तानुग्रहहेतवेधर्मसंस्थापनायच

भवताक्रियंते॥ एतेनश्रीरामस्यसर्वेषामवताराणांमवितारत्वमुक्तंभवति॥१५॥ यतश्चैवमनुभावस्त्व
मतस्त्वत्तमः॥ कोपिनास्तीत्याह॥ कालइतिकालःसर्वजगत्कलयतेतंकालंसर्वेषांग्रासकर्तृत्वंकलयसेग्रसे
॥३४॥ इत्यर्थः॥ भगवंतंप्रतिकालस्यासामर्थ्येसेतुमाह॥ त्वन्नेवसंभवइतित्वन्निमेषादिरूपः॥१६॥ किंचहंब्रह्मास्रष्टृत्वे
नप्रसिद्ध॥ स्रष्टानएवंविष्णुस्त्रातारक्षकोनहरः॥ शिवोन्तकरोनासिकिंतुहेनिरपेक्षे-आत्मसत्ताकामयात्व

कालाः कलयतेविश्वंतंत्वंकलयसिप्रभो॥ सत्वांकलयितुंनेशेरामत्वन्नेवसंभवः॥१६॥ नाहं
न स्रष्टास्त्वत्राताविष्णुर्नान्तकरोहरः॥ त्वदिच्छसेवसकलंविधत्सेनिरपेक्षया॥१७॥ ईक्षसेवि
श्वतश्चक्षुर्भुंक्षेत्वंविश्वतोमुखः॥ करोषिविश्वतोबाहुर्विश्वतयाश्चगच्छसि॥१८॥ पदोः
प्रतिष्ठितामर्त्याः शीर्ष्णदेवाव्यवस्थिताः॥ नाभौविनिष्ठितावेदाः श्रोत्रेव्याप्तंचराचरम्॥१९॥

दिरंसासेवसकलंपालनादिकंविधत्से॥१७॥ यतएवमतस्त्वंविश्वरूपमधिष्ठायविश्वतश्चक्षुः॥ सर्वतोमुखैर्ने
त्रैर्जगदीक्षसेविश्वतोमुखस्त्वंभुंक्षेविश्वतोबाहुस्त्वंकरोषि॥१८॥ किंचतवपदोः पादयोर्मर्त्याः प्रतिष्ठि
